११
६

अथ

ग्रन्थनाम:	"वाजसनेयसंहिता" (शुक्लयजुर्वेद:)
कर्तृनाम:	० ० ० Va-jaSaneyi Samhita
विषय:	वैदिकसाहित्यम्"

११
6

समय: शके १७४७ = A.D.

56

११/५

अथ

वाजसनेय संहिता

समाप्तः शके १७४८

११/६

तन्मः

ह्रि॰१ ॥श्रीगणेशायनमः॥हरिःॐ॥इषेत्वो॥ऊर्जेत्वावायव
१ स्थदेवोवःसविताप्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्या
यध्वमघ्न्याइन्द्रायभागंप्रजावतीरनमीवाऽअयक्ष्मा
२ मावस्तेनईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्या
त्बह्वीर्यजमानस्यपशून्पाहि॥१॥वसोःपवित्र
म॥वसोःपवित्रमसिद्यौरसिपृथिव्यसिमातरिश्वनो १

घर्म्मोसि विश्वधा ऽअसि । परमेण धाम्ना दृꣳहस्व माह्वा
र्म्मा ते यज्ञपतिर्ह्वार्षीत ॥ २ ॥ वसोः पवित्रम । वसोः पवि
त्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम । देव
स्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा
सा विश्वायुः कामधुक्षः ॥ ३ ॥ सा विश्वायुः । सा विश्वकर्म्मा सा विश्व
धायाः । इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ
रक्ष ॥ ४ ॥ अग्ने व्रतपते । व्रतं चरिष्यामि तच्छकेयं तन्मे ।

संहि० १ राध्यताम्॥इदमहमनृतात्सत्यमुपैमि॥५॥कस्त्वायुनक्ति
२ ॥सत्त्वायुनक्ति॥कस्मैत्वायुनक्ति॥तस्मैत्वायुनक्ति॥कर्म्म
णेवांवेषायवाम्॥६॥प्रत्युष्टꣳरक्षः॥प्रत्युष्टाऽअरात
यो॥निष्टप्तꣳरक्षोनिष्टप्ताऽअरातयः॥उर्वन्तरिक्षमन्वे
मि॥७॥धूरसि॥धूर्वधूर्वन्तंधूर्वतंयोऽस्मान्धूर्वतितंधू
र्वयंवयंधूर्वामः॥देवानामसिवह्नितमꣳसस्नितम
ꣳपप्रितमंजुष्टतमंदेवहूतमम्॥८॥अह्रुतमसि॥हवि २

र्वानर्दृꣳह स्वमाह्वामान्ते यज्ञपतिर्ह्वार्षीत ॥ विष्णुस्त्वाक्र
मतामुरुवातायापहतꣳ रक्षोयच्छंतांपंच ॥ ९ ॥ देवस्य ॥
त्वा ॥ सवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥
अग्नयेजुष्टंगृह्णाम्यग्नीषोमाभ्यांजुष्टंगृह्णामि ॥ १० ॥
भूतायत्वा ॥ नारातयेस्वरभिविख्येषंदृꣳहंतांदुर्याः ॥
पृथिव्यामुर्वन्तरिक्षमन्वेमिपृथिव्यास्त्वानाभौसादया

संहि० १ यामदित्याऽउपस्थेग्ने हव्यꣳ रक्ष ॥११॥ पवित्रेस्थः॥ पवि
३ त्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवि
त्रेण सूर्यस्य रश्मिभिः। देवीरापोऽअग्रेगुवोऽअग्रे
पुवोग्रऽइममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं य
ज्ञपतिं देवयुवम् ॥१२॥ युष्माऽइन्द्रः॥ युष्माऽइन्द्रोवृणी
त वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षितास्थ ॥ ३

अग्नयेत्वाजुष्टंप्रोक्षामि॥अग्नीषोमाभ्यांत्वाजुष्टंप्रोक्षा॥
मि॥दैव्यायकर्मणेशुंधध्वंदेवयज्यायैयद्वोऽशुद्धाःप
राजघ्नुरिदंवस्तच्छुंधामि॥१३॥शर्म्मासि॥शर्म्मास्यवधू
तꣳरक्षोऽवधूताऽअरातयोदित्यास्त्वगसिप्रतित्वादि
तिर्वेत्तु॥अद्रिरसिवानस्पत्योग्रावासिपृथुबुध्नःप्रति
त्वादित्यास्त्वग्वेत्तु॥१४॥अग्नेस्तनूरसि॥वाचोविसर्ज्ज

संहि०१ नं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः सऽइदं देवे
६ भ्यो हविः शमीष्व सुशमि शमीष्व हविष्कृदेहि हविष्कृदेहि १५ वि
कुक्कुटोसि मधुजिह्वऽइषमूर्जमावद त्वया वयं संघा
तं संघातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापू
तं रक्षः परापूताऽअरातयोपहतं रक्षो वायुर्वो विविन
क्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपा ६

णीनो ॥ १६ ॥ धृष्टिरसि ॥ धृष्टिरस्यपाग्नेऽअग्निमामादंजहि
निष्क्रव्यादꣳसेधादेवयजंवह ॥ ध्रुवमसिपृथिवींदृꣳ
हब्रह्मवनित्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्यस्य
वधाय ॥ १७ ॥ अग्नेब्रह्मगृभ्णीष्वधरुणमस्यन्तरिक्षंदृ
ꣳहब्रह्मवनित्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृ
व्यस्यवधाय ॥ धर्त्रमसिदिवंदृꣳहब्रह्मवनित्वाक्षत्रवनिस

संहि॰अ॰१ जातवेदस्युपदधामि भ्रातृव्यस्यवधाय॥ विश्वाभ्यस्त्वाशाभ्य
५ ऽउपदधामि चितस्थोर्ध्वचितो भृगूणामंगिरसांतपसातप्
प्यध्वम्॥१८॥ शर्म्मासि॥ शर्म्मास्यवधूतꣳरक्षोवधूताऽअ
रातयोदित्यास्त्वगसिप्रतित्वादितिर्वेत्तु धिषणासिपर्वती
प्रतित्वादित्यास्त्वग्वेत्तु दिवस्कंभनीरसि धिषणासिपार्व
तेयीप्रतित्वापर्वतीवेत्तु धान्यमसि॥१९॥ धान्यमसि॥ धिनु ५

हि देवान्प्राणायत्त्वोदानायत्त्वा व्यानायत्त्वा ॥ दीर्घामनुप्र॥
सितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्व
च्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥२०॥ देवस्य त्वा
॥ सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ संवपामि
समापऽओषधीभिः समोषधयो रसेन ॥ सं रेवतीर्जगती॥
भिः पृच्यंतां सं मधुमतीर्मधुमतीभिः पृच्यंताम् ॥२१॥ जन

संहि॰ प॰ १ यत्यै त्वा॥ संय्यौमी दमग्नेरिदमग्नीषोमयोरिषेत्वा घर्म्मोसि वि
६ श्वायुरुरुप्रथाऽउरुप्रथस्वोरुतेयज्ञपतिः प्रथतामग्निष्टे
त्वचम्मा हिंᳪसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेधिनाके
२२ माभेर्म्मा संविक्थाऽअतमेरुर्य्यज्ञोतमेरुर्यजमानस्य
प्रजाभूयात्त्रिताय त्वा द्वितायत्वैकतायत्वा २३ देवस्य
त्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम॥ आ ६

द्देध्वरकृतंदेवेभ्यःऽइंद्रस्यबाहुरसिदक्षिणःसहस्रभृ
ष्टिःशततेजावायुरसितिग्मतेजाद्विषतोवधः॥२४॥पृ
थिविदेवयजनि॥पृथिविदेवयजन्योषध्यास्तेमूलंमा
हिंसिषंव्रजंगच्छगोष्ठानंवर्षतुतेद्यौर्बधानदेवसवि
तःपरमस्यांपृथिव्यांशतेनपाशैर्योऽस्मान्द्वेष्टियंचव
यंद्विष्मस्तमतोमामौक्॥२५॥अपाररुं॥पृथिव्यैदेवय

संहि॰ १
७

जनाद्वध्यासंव्रजंगच्छगोष्ठानंवर्षतुतेद्यौर्बधानदेवस
वितःपरमस्यांपृथिव्यांशतेनपाशैर्य्योस्मांद्वेष्टियंच
वयंद्विष्मस्तमतोमामौक॥ अररोदिवंमापप्तोद्रप्सस्तेद्यां
मास्कन्व्रजंगच्छगोष्ठानंवर्षतुतेद्यौर्बधानदेवसवितःप
रमस्यांपृथिव्यांशतेनपाशैर्य्योस्मांद्वेष्टियंचवयंद्वि
ष्मस्तमतोमामौक॥ २६॥ गायत्रेणत्वा॥ छंदसापरिगृह्णामि॥ ७

मि त्रैष्टुभेन त्वा छंदसा परिगृह्णामि जागतेन त्वा छंदसा प
रिगृह्णामि ॥ सुक्ष्मा चासि शिवा चासि स्योना चासि सुष
दा चासूर्जस्वती चासि पयस्वती च ॥ २७ ॥ पुराक्रूरस्य ॥
विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् ॥ यामैर
यंश्चंद्रमसि स्वधाभिस्तामु धीरासोऽनुदिश्य यजंते ॥
या॰ प्रोक्षणीरासादय द्विषतो वधोसि ॥ २८ ॥ प्रत्युष्टं रक्षः प्रत्यु

संहि॰प॰ १
८

ष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः ॥ अनिशि
तोसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि ॥ प्रत्युष्टꣳ
रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः
॥ अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमा
र्ज्मि ॥ २९ ॥ अदित्यै रास्नासि ॥ विष्णोर्वेष्पोस्यूर्जे त्वादब्धे
न त्वा चक्षुषावपश्यामि ॥ अग्नेर्जिह्वासि सुहूर्देवेभ्यो धा ॥

८

म्नेधाम्नेमेभवयजुषेयजुषे ॥३१॥ सवितुस्त्वा प्रसवऽ

उत्पुनाम्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः सवितु

र्वः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मि

भिः ॥ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रि

यंदेवानामनाधृष्टंदेवयजनमसि ॥३१॥ इतिवाजस

नेसंहितायांप्रथमोध्यायः ॥१॥ श्री ॥ र्नेक्रमोस्ति कृ ॥

सं०हि० ९

ष्णोस्याखरेष्ठोग्नयेत्वाजुष्टंप्रोक्षामिवेदिरसिबर्हिषे। कृ
त्वाजुष्टंप्रोक्षामिबर्हिरसिस्रुग्भ्यस्त्वाजुष्टंप्रोक्षाम्य।
दित्यैव्युंदनं॥१॥ अदित्यैव्युंदनमसिविष्णोस्तुपो॥
स्यूर्णम्रदसंत्वास्तृणामिस्वासस्थांदेवेभ्योभुवपत
येस्वाहाभुवनपतयेस्वाहाभूतानांपतयेस्वाहा॥२॥
गंधर्वस्त्वाविश्वावसुःपरिदधातुविश्वस्यारिष्ट्यैय ९

जमानस्यपरिधिरस्यग्निरिडईडितः ॥ इंद्रस्यबाहुरसि
दक्षिणोविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरि
डईडितः ॥ मित्रावरुणौत्वोत्तरतःपरिधत्तांध्रुवेणध
र्मणाविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरि
डईडितः ॥ ३ ॥ वीतिहोत्रंत्वाकवेद्युमंतꣳसमिधीम
हि ॥ अग्नेबृहंतमध्वरे ॥ ४ ॥ समिदसिः सूर्यस्त्वापुर

संहि०
२१

स्त्वापातुकस्याश्चिदभिशस्त्यै। सवितुर्बाहूस्थःऽऊर्ण्णा। श्र·
म्रदसंत्वास्तृणामिस्वासस्थंदेवेभ्यःऽआत्वावसवोरुद्रा
ऽआदित्याःसदंतु। घृताच्यसि। जुहूर्न्नाम्नासेदंप्रि
येणधाम्नाप्रियᳫंसदऽआसीदघृताच्यस्युपभृन्ना
म्नासेदंप्रियेणधाम्नाप्रियᳫंसदऽआसीदघृताच्य॥
सिध्रुवानाम्नासेदंप्रियेणधाम्नाप्रियᳫंसदऽआसी २१

द्प्रियेणाधाम्नाप्रियꣳ सदऽआसीद॥ध्रुवाऽअसदंनृत
स्ययोनौताविष्णोपाहिपाहियज्ञंपाहियज्ञपतिंपाहिमां।
यज्ञंन्यम्॥६॥अग्नेवाजजित॥अग्नेवाजजिद्वाजंत्वास।
रिष्यंतंवाजजितꣳ संमार्ज्मि॥नमोदेवेभ्यःस्वधापितृ
भ्यः सुयमेमेभूयास्तमस्कंनमद्य॥७॥अस्कंनमद्यदे
वेभ्यःऽआज्यꣳ संभ्रियासमंघ्रिणाविष्णोमात्वावक्र॥

संहि॰ मिषंवसुमतीमग्नेतेछायामुपस्थेषं॥ विष्णोस्थानमसीतऽ अ॰२
२२ इंद्रोवीर्यमकृणोदूर्ध्वोध्वरऽआस्थात॥८॥ अग्नेवेः॥ अ
ग्नेवेर्होत्रंवेर्दूत्यमवतांत्वांद्यावापृथिवीऽअवत्वंद्यावा
पृथिवीस्विष्टकृद्देवेभ्यऽइंद्रऽआज्येनहविषाभूत्स्वाहा
संज्योतिषाज्योतिः॥९॥ मयीदम॥ मयीदमिंद्रइंद्रियंदधा
त्वस्मान्रायोमघवानः सचंताम॥ अस्माकंसंत्वाशि॥ २२

ष्वं सत्यानः संखुन्नीषु ऽनुपहूता पृथिवी मातोपमां पृथि
वी माता ह्वयतामग्निराग्नीध्रात्स्वाहा ॥ २० ॥ उपहूतो द्यौ
ऽनुपहूतो द्यौष्पितोपमां द्यौष्पिता ह्वयतामग्निराग्नी।
ध्रात्स्वाहा ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पू ॥
ष्णो हस्ताभ्याम् ॥ प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ॥ २१ ॥ ए
तं ते ॥ देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव

संहि॰ तेनयज्ञपतिंतेनमामव ॥ १२ ॥ मनोज्जूति ॥ मनोजूतिर्ज्जुषता अ॰ २
१२ माज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमंदधा
तु । विश्वेदेवासइहमादयंतामों ॐ प्रतिष्ठ ॥ १३ ॥ एषातेअ
ग्नेसमित्तयावर्धस्वचाचप्यायस्व । वर्द्धिषीमहिचवयमा
चप्यासिषीमहि ॥ अग्नेवाजजिद्वाजंत्वाससृवाꣳसंवा
जजितꣳसंमार्ज्मि ॥ १४ ॥ अग्नीषोमयोरुज्जितिम् ॥ अग्नी १२

षोमयोरुज्जितिमनूज्जेषंव्वाजस्यमाप्रसवेनप्प्रोहामि ॥
अग्नीषोमौतमपनुदतांयोस्मांद्वेष्टियंचवयंद्विष्मोंव्वाज
स्यैनंप्रसवेनापोहामि ॥ इंद्राग्न्योरुज्जितिमनूज्जेषंव्वाज
स्यमाप्रसवेनप्प्रोहामि ॥ इंद्राग्नीतमपनुदतांयोस्मांद्वेष्टि
वं यंचवयंद्विष्मोंव्वाजस्यैनंप्रसवेनापोहामि ॥ ३५ ॥ वसुभ्यस्त्वा
रुद्रेभ्यस्त्वादित्येभ्यस्त्वासंजानाथांद्यावापृथिवीमित्रा।

सं॰हि॰ वरुणौत्वावृष्ट्यावताम्॥ व्यंतुवयोक्तꣳरिहाणामरुतांपृषती। अ॰ २
२३ र्गच्छवशापृश्निर्भूत्वादिवंगच्छततोनोवृष्टिमावह॥ चक्षु
ष्पाऽअग्नेसिचक्षुर्मेपाहि॥ १६॥ यंपरिधिंपर्यधत्थाऽअ
ग्नेदेवपणिभिर्गुह्यमानः॥ तंतऽएतमनुजोषंभराम्येषने
त्त्वदपचेतयाताऽअग्नेः प्रियंपाथोपीतम्॥ १७॥ संस्र
वभागास्थ॥ संस्रवभागास्थेषाबृहंतः प्रस्तरेष्ठाः प। २३

रिषेयाश्चदेवाःऽइमांव्वाचमभिव्विश्वेगृणंतऽआसद्यास्मिं
न्बर्हिषिमादयध्वꣳस्वाहावाट्॥१८॥घृताचीस्थः॥घृता
चीस्थोधुर्यौपातꣳसुम्नेस्थःसुम्नेमाधत्तम्॥यज्ञनमः।
श्चतऽउपचयज्ञस्यशिवेसंतिष्ठस्वस्विष्टेमेसंतिष्ठस्व॥१९॥
अग्नेदब्धायोऽशीतमपाहिमादिद्योःपाहिप्रसित्यै।
पाहिदुरिष्ट्यैपाहिदुरद्मन्याऽअविषंनःपितुंकृणुसुष

संहि॰ २८

दायोनौस्वाहा॥ वाडग्नये स्वंवेन्नापत्तयेस्वाहा॥ सरस्वत्यैय श्री.२

त्रोष्नगिन्मेस्वाहा॥ २९॥ वेदोसि॥ येनत्वंदेववेद देवेभ्योवे

दोभवस्तेनमत्त्वंवेदोभूयाः॥ देवागातुविदोगातुंवित्वा

गातुमित॥ मनसस्पतइमंदेवयज्ञं स्वाहावातेधाः॥

२२॥ संबर्हिः॥ संबर्हिरंक्ता हविषाघृतेनसमादित्यैर्व

सुभिः संमरुद्भिः॥ सभिंद्रोविश्वदेवेभिरंक्तांदिव्यंनभो २८

गच्छतुयत्स्वाहा ॥२२॥ कस्त्वा ॥ विमुंचतिसत्वाविमुंच

तिकस्मैत्वाविमुंचतितस्मैत्वाविमुंचति ॥ पोषायरक्ष

सांभागोसि ॥२३॥ संवर्च्चसा ॥ पयसासंतनूभिरग

न्महिमनसासꣳशिवेन ॥ त्वष्टासुदत्रोविदधातुरायो

नुमार्ष्टुतन्वोयद्विलिष्टम् ॥२४॥ दिविव्विष्णुः ॥ दिविव्वि

ष्णुर्व्यक्रꣳस्तजागतेनछंदसाततोनिर्भक्तोयोस्मां

संहि० द्वेष्टियंचवयंद्विष्मोऽन्तरिक्षेविष्णुर्व्यक्रंस्तत्रैष्टुभेनछं अ० २
२५ दसाततोनिर्भक्तोयोस्मांद्वेष्टियंचवयंद्विष्मःपृथि
व्यांविष्णुर्व्यक्रंस्तगायत्रेणछंदसाततोनिर्भक्तोयो
स्मांद्वेष्टियंचवयंद्विष्मोस्मादन्नादस्यैप्रतिष्ठायाअ
गन्मस्वःसंज्योतिषाभूम॥२५॥स्वयंभूरसिश्रेष्ठोरश्मि
र्वर्चोदाऽअसिवर्चोमेदेहिसूर्यस्यावृतमन्वावर्ते॥२६ २५

अग्नेगृहपते। सुगृहपतिस्त्वयाग्नेहंगृहपतिनाभूयास
ꣳसुगृहपतिस्त्वंमयाग्नेगृहपतिनाभूयाः। अस्थूरिणौ
गार्हपत्यानिसंतुशतꣳहिमाःसूर्यस्यावृतमन्वावर्त्ते॥
२७॥ अग्नेव्रतपते। व्रतमचारिषंतदशकंतन्मेराधीदमहं
यएवास्मिसोस्मि॥ २८॥ अग्नयेकव्यवाहनाय। स्वाहा
सोमायपितृमतेस्वाहा। अपहताऽअसुरारक्षाꣳसिवे

संहि॰ २६

द्विषदः॥२९॥ येरूपाणि॥ प्रतिमुंचमाना॥ असुराः संतः स्व
धयाचरंति॥ परापुरोनिपुरोयेभरंत्यग्निष्टांल्लोकात्प्रणु
दात्यस्मात्॥३०॥ अत्रपितरः॥ अत्रपितरोमादयध्वंय
थाभागमावृषायध्वम्॥ अमीमदंतपितरोयथाभाग
मावृषाऽइषत॥३१॥ नमोवः॥ पितरोरसायनमोवःपितर
ःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायै

अ॰२ २६

नमोवःपितरोघोरायनमोवःपितरोमंन्यवेनमोवःपि
तरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपितरोदे
ष्मैतद्वःपितरोवासआधत्त ॥३२॥ आधत्तपितरोगर्भंकु
मारंपुष्करस्रजम् ॥ यथेहपुरुषोसत् ॥३३॥ ऊर्जंवहं
ती॥रमृतंघृतंपयःकीलालंपरिस्रुतम् ॥ स्वधास्थतर्पयत
मेपितॄन् ॥३४॥ इतिवाजसनेसंहितायांद्वितीयोध्यायः

संहि॰ समिधाग्निम्॥ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्॥ अ॰३
१७ आस्मिन्हव्या जुहोतन॥१॥ सुसमिद्धाय शोचिषे घृतं तीव्रं
जुहोतन॥ अग्नये जातवेदसे॥२॥ तन्त्वा समिद्भिरङ्गिरो घृ
तेन वर्द्धयामसि॥ बृहच्छोचा यविष्ठ्य॥३॥ उपत्वाग्ने ह
विष्मतीर्घृताचीर्यन्तु हर्यत॥ जुषस्व समिधो मम॥४॥ भूर्भु
भूर्भुवः वः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा॥ तस्यास्ते पृथिवि १७

विदेवयजनिपृष्ठेग्निमन्नादमन्नाद्यायादधे॥५॥आ
यंम॥ आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः॥ पित
रंचप्रयंत्स्वः॥६॥ अंतश्चरति रोचनास्यप्राणादपान
ती॥ व्यख्यन्महिषोदिवम्॥७॥ त्रिंशद्धाम॥ विराजति॥
वाक्पतंगायधीयते॥ प्रतिवस्तोरहद्युभिः॥८॥ अग्नि
र्ज्योतिः॥ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्योज्यो

संहिपि
२९

तिर्ज्योतिः सूर्यः स्वाहा॥ अग्निर्वर्च्चोज्योतिर्वर्च्चः स्वाहासू अ०३

र्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा॥ ज्योतिः सूर्यः सूर्योज्योतिः स्वा

हा॥ ९॥ सजूर्देवेन॥ सवित्रा सजूं रात्र्येंद्रवत्या॥ जुषाणो॥

ऽअग्निर्वेतु स्वाहा॥ सजूर्देवेन सवित्रा सजूरुषसेंद्रव

त्या॥ जुषाणः सूर्योवेतु स्वाहा॥ १०॥ उपप्रयंतोऽअध्व

रं॥ उपप्रयंतोअध्वरं मंत्रं वोचेमाग्नये॥ आरेऽअस्मु २९

स्मे च वसूं रावते ॥ २७ ॥ अग्निर्मूर्द्धा ॥ दिवः ककुत्पतिः पृथि
व्या ऽ अयम् ॥ अपाꣳ रेताꣳ सि जिंन्वति ॥ २८ ॥ नु न्ना वा
मु ॥ नु न्ना वाभिंद्राग्नी आकु वध्यां नु न्ना राधसः सह मा ।
दृ य धै ॥ नु न्ना दा ता तारा विषाꣳ रयीणा मु न्ना वाज्मस्य ।
सातये हुवे वाम् ॥ २९ ॥ अयं ते ॥ योनि ऽ ऋत्वियो यतो जा
तो ऽ अरोचथाः ॥ तं जानं नग्न आरोहाथा नो वर्द्धया रु ।

सं॰हिं॰ षिम॥२४॥ अयमिह॥ प्रथमो धायि धातृभिर्होता यजिष्ठो अ॰३
१९ अध्वरेष्वीड्यः॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चि
त्रं विभ्वं विशे विशे॥२५॥ अस्य प्रत्नाम॥ अस्य प्रत्नाम
नुद्युतं शुक्रं दुदुह्रे अह्रयः॥ पयः सहस्रसामृ
षिम॥२६॥ तनूपा अग्नेसि॥ तन्वं मे पाह्यायुर्दा अग्ने
स्यायुर्मे देहि वर्चोदा अग्नेसि वर्चो मे देहि॥ अग्ने य १९

मेतन्वाऽऊनंतन्मआपृण ॥ १७ ॥ इंधानास्त्वा शतᳬं हि
माद्युमंतᳬं समिधीमहि । वयस्वंतोवयस्कृतᳬं सह
स्वंतः सहस्कृतम् । अग्ने सपत्नदंभनमदब्धासोऽअ
दाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ॥ १९ ॥ सन्त्वम
ग्ने सूर्यस्य वर्चसागथाः समृषीणाᳬं स्तुते
न । सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रज

संहि॰ युासर्ठ॰ रायस्पोषेणग्मिषीय ॥ १९ ॥ अन्धस्थ ॥ अन्धु अ॰ ३
२१ स्थान्धोवोभक्षीय महस्थ महोवोभक्षीयोर्जस्थोर्जं
वोभक्षीय रायस्पोषस्थ रायस्पोषंवोभक्षीय ॥ २० ॥
रेवतीरमध्वम ॥ रेवतीरमध्वमस्मिन्योनावस्मिन्गोष्ठे
स्मिंल्लोकेस्मिन्क्षये ॥ इहैवस्तमापगात ॥ २१ ॥ सर्ठ॰
हितासि ॥ विश्वरूप्यूर्जामाविश गौपत्येन ॥ उपत्वा २१

ग्ने दिवे दिवे दोषावस्तर्द्धियाव्वयम ॥ नमोब्भरंतएमसि

२२ ॥ राजन्तमध्वराणां ॥ गोपामृतस्य दीदिविम् वर्द्धमा

नं स्वे दमे ॥ २३ ॥ स नः पितेव सूनवेग्ने सूपायनो भव

सचस्वा नः स्वस्तये ॥ २४ ॥ अग्ने त्वं ॥ अग्ने त्वन्नो अ

न्तम उत त्राता शिवो भवा वरूथ्यः ॥ वसुरग्निर्वसुश्र

वाः ॥ अच्छा नक्षि द्युमत्तमं रयिन्दाः ॥ २५ ॥ तन्त्वा ॥ शो ।

संहि० चिष्टद्दीदिवःसुम्नायन्नूनमीमहेसखिभ्यः ॥ सनोबो अ०३
२१ धिश्रुधीहवमुरुष्याणोअघायतःसमस्मात् ॥ २६
इडऽएहि ॥ इडऽएह्यदितऽएहिकाम्म्याऽएत ॥ मयिवः
कामधरणंभूयात् ॥ २७ ॥ सोमानंस्वरणंकृणुहिब्र
ह्मणस्पते ॥ कक्षीवन्तंयऽऔशिजः ॥ २८ ॥ योरेवा
न्योअमीवहावसुवित्पुष्टिवर्द्धनः ॥ सनः २१

ःसिषक्तु यस्तुरः ॥२॥ मा नः ॥ मा नः शंसो ऽअर
रुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥३॥ म
हि त्रीणाम॥ महि त्रीणामवोस्तु द्युक्षम्मित्रस्यार्यम्णः
॥ दुराधर्षं वरुणस्य ॥१॥ नहि तेषाम् ॥ नहि तेषाममा चन
नाध्वसु वारणेषु ॥ ईशे रिपुरघशंसः ॥२॥ ते हि ॥ पु
त्रासो ऽअदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्र

सहि॰ स॥३३॥ कदाचन॥ स्तरीरसि नेंद्र सश्चसि दाशुषे॥ उपोपे त्र॰२
२२बु न्नु मघवं भूय इन्नु ते दानं देवस्य पृच्यते॥३४॥ तत्सवितुः
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचो
दयात॥३५॥ग्नातम॥२००॥ परि ते॥ परित्ते दूडभो रथोस्माँ
अश्नोतु विश्वतः॥ येन रक्षसि दाशुषः॥३६॥ न्नू
र्वं स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपो २२

षः पोषैः॥ नर्य प्रजां मे पाहि शंस्य पशून्मे पाह्यथर्य
पितुं मे पाहि॥ ३६॥ आगन्म विश्ववेदसमस्मभ्यं व
सुवित्तमम्॥ अग्ने सम्राडभि द्युम्नमभि सह आय
च्छस्व॥ ३७॥ अयमग्निः॥ अयमग्निर्गृहपतिर्गार्हप
त्यः प्रजाया वसुवित्तमः॥ अग्ने गृहपते ऽभि द्युम्नम
भि सह आयच्छस्व ३८॥ अयमग्निः॥ पुरीष्यो रयि

संहि० मान्तुष्टिवर्द्धनः ॥ अग्ने पुरीष्याभिद्युम्नमभिसह ऽ आ अ० ३

२३ यच्छस्व ॥ ४० ॥ गृहा मा बिभीत मा वेपध्वमूर्ज्जं बिभ्रत ऽ

एमसि ॥ ऊर्ज्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मन

सा मोदमानः ॥ ४१ ॥ येषामध्येति प्रवसन्येषु सौमन

सो बहुः ॥ गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥ ४२ ॥

उपहूता ऽ इह गाव ऽ उपहूता ऽ अजावयः ॥ अथो ऽ अन्न २३

नस्यकीलालउपहूतोगृहेषुनः॥क्षेमायवःशांत्यैप्रप
द्ये शिवंशग्मंशंयोःशंयोः॥ध३॥प्रघासिनोहवा।
महे॥प्रघासिनोहवामहेमरुतश्चरिशादसः॥करंभेण
सजोषसः॥धध॥यद्ग्रामे॥यद्ग्रामेयदरण्येयच्छभायां।
यदिंद्रिये॥यदेनश्चकृमावयमिदंतदवयजामहेस्वा।
हा॥धध॥मोषूणः॥मोषूणइंद्रात्रपृत्सुदेवैरस्तिहिष्मा

संहि· तेस्मृषिंन्नवृयाः॥ महश्चिद्यस्यमीढुषोयव्याहविष्मतो अ·३
२५ मरुतोवंदतेगीः॥४६॥ अक्रान्कर्म्मकर्मकृतःसहवा
चामयोभुवा॥ देवेभ्यः कर्मकृत्वास्तंप्रेतसचाभुवः॥
४७॥ अवभृथनिचुंपुण॥ निचेरुरसिनिचुंपुणः॥ अ
वदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुरा
व्णोदेवरिषस्पाहि॥४८॥ पूर्णादर्वि॥ परापतसुपूर्णा २६

पुनरापत॥ वस्नैव विक्रीणावहा ऽइषमूर्ज्जं शतक्रतो॥
४९॥ देहि मे॥ ददामि ते नि मे धेहि नि ते दधे॥ निहारं च ह
रासि मे निहारं निहराणि ते स्वाहा॥ ५०॥ अक्षन्नमीमद
न्त ह्यव प्रिया ऽअधूषत॥ अस्तोषत स्वभानवो विप्रा॥
नविष्ठया मती योजा न्विन्द्र ते हरी॥ ५१॥ सुसंदृशं त्वा व
यं मघवन्वन्दिषीमहि॥ प्र नूनं पूर्णबन्धुरस्तुतो यासि व

संहि०
२५
ग्राः शाँ ॥ ऽअनुयोजान्विंद्रतेहरी ॥ ५२ ॥ मनोनु ॥ मनोन्वाह्वा अ० ३
महेनाराशर्ठ॰सेनसोमेन ॥ पितॄणांच्चमन्मभिः ॥ ५३ ॥
आनः ॥ आनऽएतुमनः पुनः क्रत्वेदक्षायजीवसे ॥
ज्योक्चसूर्यंदृशे ॥ ५४ ॥ पुनर्नः पितरोमनोददातुदै
व्योजनः ॥ जीवंव्रातर्ठ॰सचेमहि ॥ ५५ ॥ वयर्ठ॰सोम ॥ व्रते
तवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तः सचेमहि ॥ ५६ ॥ एषते २५

।रुद्रभागःसहस्वस्रांबिकयातंजुषस्वस्वाहैषतेरुद्रभा

गऽआखुस्तेपशुः॥५१॥अवरुद्रम॥अवरुद्रमदीमह्य

वदेवंत्र्यंबकं॥यथानोवस्यसस्करद्यथानःश्रेयसस्क

रद्यथानोव्यवसाययात॥५२॥भेषजमसि॥भेषजंग

वेश्वायपुरुषायभेषजम॥सुखंमेषायमेष्यै॥५३॥त्र्यं

बकं॥यजामहेसुगंधिंपुष्टिवर्द्धनम॥उर्वारुकमिवबं

सं॰हि॰ धनान्मृत्योर्मुक्षीयमामृतात्॥त्र्यंबकंयजामहेसुगंधिं त्र॰१
२६ पतिवेदनम्॥उर्व्वारुकमिवबंधनादितोमुक्षीयमामुत
ः॥६०॥एतत्ते॥एतत्तेरुद्रावसंतेनपरोमूजवतोऽतीहि॥अ
वततधन्वापिनाकावसःकृत्तिवासाऽअहिंसन्नः
शिवोऽतीहि॥६१॥त्र्यायुषम्॥त्र्यायुषंजमदग्नेःकश्यप
स्यत्र्यायुषम्॥यद्देवेषुत्र्यायुषंतन्नोऽअस्तुत्र्यायुषम् २६

६२॥ शिवो नाम॥ शिवो नामासि स्वधितिस्ते पिता नमस्ते
ऽअस्तु मा मा हिᳩ᳭सीः॥ निवर्त्तयाम्यायुषेन्नाद्यायप्र
जननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥६३॥
इति वाजसनेसंहितायां तृतीयोध्यायः॥ एदम्॥ एदम
गन्म देवयजनं पृथिव्या यत्र देवासो ऽअजुषन्त विश्वे॥
ऋक्सामाभ्याᳩ᳭ संतरन्तो यजुर्भी रायस्पोषेण समिधा

सं॰हि॰ मंदेम॥ इमा ऽ आपः शमु मे संतु देवी रोषधे त्रायस्व स्वधि अ॰४
२७ ते मैनꣳ हिꣳसीः॥ १॥ आपो ऽ अस्मान॥ आपो ऽ अ॥
स्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु॥ विश्वꣳ
हि रिप्रं प्रवहंति देवी रुदिदाभ्यः शुचिरा पूत एमि॥ दी
क्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्मां परि दधे भ
द्रं वर्णं पुष्यन्॥ २॥ महीनां पय॥ महीनां पयोसि वर्चोदा २७

ऽअसिवर्चोमेदेहि॥वृत्रस्यासिकनीनकश्चक्षुर्दाऽअ॥
सिचक्षुर्मेदेहि॥३॥चित्पतिर्मापुनातुवाक्पतिर्मापुनातु
देवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मि
भिः॥तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेत
च्छकेयम्॥४॥आव॥१॥आवोदेवासईमहेवामंप्रयत्य
ध्वरे॥आवोदेवासऽआशिषोयज्ञियासोहवामहे

सं.हि. ॥५॥स्वाहायज्ञं॥मनसःस्वाहोरोरंतरिक्षात्स्वाहाद्या अ.४
२८ वापृथिवीभ्यांस्वाहावातादारभेस्वाहा॥६॥आ
कूत्यैप्रयुजे॥आकूत्यैप्रयुजेग्नयेस्वाहामेधायैमन
सेग्नयेस्वाहादीक्षायैतपसेग्नयेस्वाहासरस्वत्यैपू
ष्णेग्नयेस्वाहा॥आपोदेवीर्बृहतीर्विश्वशंभुवोद्या
वापृथिवीऽउरोऽअंतरिक्ष॥बृहस्पतयेहविषाविधे २८

मुस्वाहा ॥ ७ ॥ विश्वो देवस्य । नेतुर्म्मर्त्तो वुरीत सख्यम् । वि
श्वे राय ऽइषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥ ८ ॥ ऋ
क्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य य
ज्ञस्योदृचः । शर्म्मासि शर्म्म मे यच्छ नमस्ते ऽअस्तु मा मा
हिंसीः ॥ ९ ॥ ऊर्ग्गस्याङ्गिरस्यूर्णम्रदा ऽऊर्जं म
यि धेहि । सोमस्य नीविरसि विष्णोः शर्म्मासि शर्म्म य

संहि. जेमानुस्येंड्रस्ययोनिरसिसुसस्याः कृषीस्कृधि।उ कृ. ४
२९ छूयस्त्ववनस्पतऽऊर्ध्वोमापाह्यंहसःऽआस्ययज्ञ
स्योदृचः॥ १५॥ व्रतंकृणुत। व्रतंकृणुताग्निर्ब्रह्माग्निर्य
ज्ञोवनस्पतिर्यज्ञियः॥ दैवींधियंमनामहेसुमृडीकाम
भिष्टयेवर्चोधांयज्ञवाहसं सुतीर्थानोऽअसद्वशे
॥ येदेवामनोजातामनोयुजोदक्षक्रतवस्तेनोवंतुतेनः २९

ः पांतु तेभ्यः स्वाहा ॥ ११ ॥ श्वात्राः पीताः ॥ श्वात्राः पीता भ
वत यूयमापोऽअस्माकमंतरुदरे सुशेवाः ॥ ताऽअस्म
भ्यमयक्ष्माऽअनमीवाऽनागसः स्वदंतु देवीरमृ
ताऽऋतावृधः ॥ १२ ॥ इयंते यज्ञियातनूरपो मुंचामि
नप्रजाम ॥ अꣳहोमुचः स्वाहाकृताः पृथिवीमाविश
त पृथिव्या संभव ॥ १३ ॥ अग्ने त्वम ॥ अग्ने त्वꣳ सुजागृ

हि व्वयꣳ स्सुमन्दिषीमहि। रक्षाणोऽअप्रयुच्छन्प्रबुधेनः
पुनस्कृधि॥१४॥ पुनर्म्मनः॥ पुनर्म्मेतः पुनरायुर्म्मऽआग॥
न्पुनः प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्रोत्रं
मऽआगन्॥ वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्नः पा
तु दुरितादवद्यात्॥१५॥ त्वमग्ने॥ व्रतपाऽअसि देवऽ
आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥ रास्वेयत्सोमा भूयो भर॥

क्षत्रियासियज्ञियास्यदितिरस्युभयतःशीर्ष्णी॥ सा ग्रो॰ ५

देवोनःसवितावसोर्द्दातावस्वदात॥१६॥एषाते॥शुक्र
तनूरेतद्वर्च्चस्तयासंभवभ्राजंगच्छ॥जूरसिधृतामनसा
जुष्टाविष्णवे॥१७॥तस्यास्ते॥सत्यसवसःप्रसवेतन्वो।
यंत्रमशीयस्वाहा॥शुक्रमसिचंद्रमस्यमृतमसिवैश्व
देवमसि॥१८॥चिदसि॥मनासिधीरसिदक्षिणासि।
नःसुप्राचीसुप्रतीच्येधिमित्रस्त्वापदिबध्नीतांपूषा

सं०टि० ध्रुवन्नस्मालिंद्रायाध्यक्षाय॥१९॥ अनुत्वा॥ मातामन्यताम अ०४
३१ नुपितानुभ्रातासगर्भ्योनुसखासयूथ्यः॥ सादेविदेव।
मच्छेहींद्रायसोमं रुद्रस्त्वावर्त्तयतुस्वस्तिसोमसखा
पुनरेहि॥२०॥ वस्व्यसि॥ वस्व्यस्यदितिरस्यादित्यासि।
रुद्रासिचंद्रासि॥ बृहस्पतिष्ट्वासुम्नेरम्णातुरुद्रोवसु
भिराचके॥२१॥ अदित्यास्त्वा॥ मूर्धन्नाजिघर्मिदेवय। ३१

जनेष्टपृथिव्याऽइडायास्पदमसिघृतवत्स्वाहा ॥ अस्मेरा॥
मस्वास्मेतेबंधुस्त्वेरायोमेरायोमावयठं रायस्पोषेण
विवियौष्मतोतोरायः ॥२२॥ समख्ये ॥ देव्याधियासंदक्षि॥
णयोरुचक्षसा ॥ मामऽआयुःप्रमोषीर्मोऽअहंतववीरं
विदेयतवदेविसंदृशि ॥२३॥ एषते ॥ गायत्रोभागऽइति
मेसोमायब्रूतादेषतेत्रैष्टुभोभागऽइतिमेसोमायब्रूता

संहि॰ दृषते जागतो नागौ तौ नौ गःऽ इति मे सोमाय ब्रूता छंदो नामा अ॰ ४
३२ नाꣳ साम्राज्यं गछेति मे सोमाय ब्रूतां स्माको सि शुक्रस्ते
ग्रहो विचितस्त्वा विचिन्वंतु ॥ २४ ॥ अभि त्यं देवꣳ सवि।
तारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि ।
प्रियं मतिं कविम ॥ ऊर्ध्वा यस्यामतिर्भा ऽअदिद्युतत्सवी
मनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः प्रजाभ्य ३२

स्त्वाप्रजास्त्वानुप्राणंतुप्रजास्त्वमनुप्राणिहि ॥२५॥ शु
क्रंत्वा । शुक्रेणक्रीणामिचंद्रंचंद्रेणामृतममृतेन । सग्मे
तेगोरस्मेतेचंद्राणितपसस्तनूरसिप्रजापतेर्वर्णः परमे
णपशुनाक्रीयसेसहस्रपोषंपुषेयम् ॥ २६ ॥ मित्रोन ॥
मित्रोनऽएहिसुमित्रधऽइंद्रस्योरुमाविशदक्षिणमु
शंनुशंतंस्योनःस्योनम् ॥ स्वानभ्राजांघारेबंभारेह

सं॰हि॰ ३३

स्तसुहस्तकृशानवेतेवः सोमक्रयणास्तांन्रक्षध्वंमा। श्र॰४
वोदभन्॥२७॥ परिमाग्नेदुश्चरिताद्बाधस्वामासुच
रितेभज॥ उदायुषास्वायुषोदस्थाममृताँ२॥ अनु॥२८
प्रतिपंथाम॥ प्रतिपंथामपद्महिस्वस्तिगामनेहसम्
येनविश्वाः परिद्विषोवृणक्तिविंदतेवसु॥२९॥ अ
दित्यास्त्वक॥ अदित्यास्त्वगस्यदित्यैसदऽआसीद। ३३

अस्तभ्नाद्द्यां वृषभो ऽन्तरिक्षममिमीत वरिमाणं पृथि
व्याः। आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुण
स्य व्रतानि॥ ३०॥ वनेषु वि। वनेषु व्यन्तरिक्षं ततान वाज
मर्वत्सु पय उस्रियासु। हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि
सूर्यमदधात्सोममद्रौ॥ ३१॥ सूर्यस्य चक्षुः। सूर्यस्य चक्षु
रारोहाग्ने रक्ष्णः कनीनकम्। यत्रैतशेभिरीयसे भ्राज

मानोविपृक्षिता॥३२॥ ऽप्रस्त्रावेतं॥ धूर्षाहोयुज्येथामन
श्रू॰ऽअवीरहणौब्रह्मचोदनौ॥ स्वस्तियजमानस्यगृ
हान्गच्छतम्॥३३॥ भद्रोमे॥ सिप्रच्यवस्वभुवस्पतेवि।
श्वान्यभिधामानि॥ मात्वापरिपरिणोविदन्मात्वापरिपं
थिनोविदन्मात्वावृका॥ ऽअघायवोविदन्॥ श्येनोभूत्वा
परापतयजमानस्यगृहान्गच्छतंन्नौसंस्कृतम्॥३४॥ न ३४

मोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतꣳसपर्य
त॥दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशꣳस
त॥३४॥वरुणस्योत्तंभनम॥वरुणस्योत्तंभनमसिवरुण॥
स्यस्कंभसर्जनीस्थोवरुणस्यऋतसदन्यसिवरुण॥
स्यऋतसदनमसिवरुणस्यऋतसदनमासीद॥३५॥
यातेधामानिहविषायजंतितातेविश्वापरिभूरस्तुय

संहि॰ ज्ञम॥ गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्य्यी अ॰५
३५ न॥३७॥ इति वाजसनेयसंहितायां चतुर्थोध्यायः॥ अग्ने॰
स्तनूः॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि वि
ष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोम
भृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा॥१॥ अग्ने
र्ज्जनित्रम॥ अग्नेर्ज्जनित्रमसि वृषणौ स्थः उर्वश्यस्यायुर ३५

सिधुरूरवाः अ॒सि गायत्रेण त्वा छंदसा सादयामि त्रैष्टुभेन
त्वा छंदसा सादयामि जागतेन त्वा छंदसा सादयामि ॥ ३ ॥ भ
वतन्नः २ ॥ जद तन्नः २ समनसौ सचेतसावरेपसौ ॥ मा य
ज्ञ॰ हि॰ सिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य
नः ॥ ३ ॥ अग्नावग्निः ॥ अग्नावग्निश्चरति प्रविष्ट ऋषी ॥
णां पुत्रो अभिशस्तिपावा ॥ स नः स्योनः सुयजा यजेह

च्छ

देवेभ्यो हव्यꣳ सदमप्रयुत्सꣳस्वाहा ॥४॥ आपतये त्वा परि

पतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय ।

अनाधृष्टमस्यनाधृष्यं देवानामोजो नभिशस्त्यभिश

स्तिपाऽअनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳ स्विते ॥

मा धाः ॥५॥ अग्ने व्रतपाः ॥ अग्ने व्रतपास्त्वे व्रतपा या तव

तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि ॥ सह नौ व्रत

पतेव्व्रुतांन्यनुमेदीक्षांदीक्षापतिर्म्मन्यतामनुतपस्तपस्प
तिः॥६॥ अꣳशुरꣳशुष्टेदेवसोमाप्प्यायतामिंद्रायैकध
नविदे॥ आतुभ्यमिंद्रः प्प्यायतामात्वमिंद्रायप्प्यायस्व॥
आप्प्याययास्मान्त्सखीन्त्सन्न्यामेधयास्वस्तितेदेवसोम
सुत्यामशीय॥ एष्टारायः प्रेषेभगाय ऋतमृतवादिभ्यो
नमोद्यावापृथिवीभ्याम्॥७॥ याते अग्नेयः शयातनूर्व

सं.हि. र्षिष्ठागह्वरेष्ठा।उग्रंवचोऽअपावधीत्त्वेषंवचोऽअपावधी अ.५
३९ त्स्वाहा।यातेऽअग्नेरजःशयातनूर्वर्षिष्ठागह्वरेष्ठा।उ
ग्रंवचोऽअपावधीत्त्वेषंवचोऽअपावधीत्स्वाहा।यातेऽअ
ग्नेहरिशयातनूर्वर्षिष्ठागह्वरेष्ठा।उग्रंवचोऽअपावधी
त्त्वेषंवचोऽअपावधीत्स्वाहा।८।तप्तायनीमेसिवित्ताय
नीमेस्यवतान्मानाथितादवतान्माव्यथितात।विदेदग्न॥ ३९

ग्निर्नभोनामाग्नेऽअंगिरऽआयुनानाम्नेहियोस्यांपृ
थिव्यामसियत्तेनाधृष्टंनामयज्ञियंतेनत्वादधेविदेद
ग्निर्नभोनामाग्नेऽअंगिरऽआयुनानाम्नेहियोद्विती
यस्यांपृथिव्यामसियत्तेनाधृष्टंनामयज्ञियंतेनत्वाद
धेविदेदग्निर्नभोनामाग्नेऽअंगिरऽआयुनानाम्नेहि
यस्तृतीयस्यांपृथिव्यामसियत्तेनाधृष्टंनामयज्ञियं

सं.हि.
३८

तेनत्वादधे ॥ अनुत्वा देववीतये ॥ ९ ॥ सिꣳहीरसि सपत्ना अ.५
साही देवेभ्यः कल्पस्व सिꣳहीरसि सपत्नसाही देवेभ्यः
शुंधस्व सिꣳहीरसि सपत्नसाही देवेभ्यः शुंभस्व ॥ १० ॥
इंद्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः
पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्व
कर्म्मात्वादित्यैरुत्तरतः पात्विदमहं तप्तं वार्बहिर्धा य ३८

ज्ञां नि: सृजामि ॥२२॥ सिꣳह्यसि स्वाहा सिꣳह्यस्यादि

त्यवनि: स्वाहा सिꣳह्यसि ब्रह्मवनि: क्षत्रवनि: स्वा

हा सिꣳह्यसि सुप्रजावनी रायस्पोषवनि: स्वाहा सि

ꣳह्यस्यावह देवानजमानाय स्वाहा भूतेभ्यस्त्वा ॥२३

ध्रुवोसि पृथिवीं दृꣳह ध्रुवक्षिदस्यंतरिक्षं दृꣳहा

च्युतक्षिदसि दिवं दृꣳहाग्ने: पुरीषमसि ॥२४॥ युंजतेम

सं.हि. नः॥युंजतेमनःऽउतयुंजतेधियोविप्राविप्रस्यबृहतोवि अ.५
३९ पश्चितः॥विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यस
वितुःपरिष्टुतिःस्वाहा॥१४॥इदंविष्णुः॥इदंविष्णुर्विच
क्रमेत्रेधानिदधेपदम्॥समूढमस्यपांसुरेस्वाहा॥
१५॥इरावतीधेनुमतीहिभूतंसूयवसिनीमनवे
दशस्या॥व्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवी ३९

मभितोमयूखैः स्वाहा ॥ १६ ॥ देवश्रुतौ ॥ देवश्रुतौ देवेष्वा ॥
घोषतंप्राचीप्रेतमध्वरंकल्पयंती ऽऊर्ध्वंयज्ञंनयतंमा ॥
जिह्वरतम् ॥ स्वंगोष्ठमावदतंदेवीऽदुर्ये ऽआयुर्म्मानिर्वा
दिष्टंप्रजांमानिर्वादिष्टमत्ररमेथांवर्ष्मन्पृथिव्याः ॥ १७ ॥
विष्णोर्नुकंवीर्याणिप्रवोचंयः पार्थिवानिविममेरजा
ᳪसि ॥ यो ऽअस्कभायदुत्तरᳪसधस्थंविचक्रमाणस्त्रे ।

संहि॰ ४९ धोरुगायो विष्णवेत्वा ॥१८॥ दिवोवा विष्णउतवापृथि अ॰५
व्यामहोवा विष्णउरोरंतरिक्षात ॥ उभाहिहस्तावसुना
पृणस्वाप्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वा ॥१९॥ प्र
तत ॥ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरि
ष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानि
विश्वा ॥२०॥ विष्णोरराटम ॥ विष्णोरराटमसिविष्णोः ४९

श्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसि
विष्णवेत्वा॥२१॥देवस्यत्वासवितुःप्रसवेश्विनोर्बाहु
भ्यांपूष्णोहस्ताभ्याम्॥आददेनार्यसीदमहꣳरक्षसां
ग्रीवाऽअपिकृन्तामि॥बृहन्नसिबृहद्रवाबृहतीमिन्द्रा
यवाचंवद॥२२॥रक्षोहणंवलगहनंवैष्णवीमिदमहं
तंवलगमुत्किरामियंमेनिष्ट्योयममात्योनिचखानेद।

संहि॰
५१

महंतंवलगमुत्किरामियंमेसमानोयमसमानोनिचखा अ॰५
नेदमहंतंवलगमुत्किरामियंमेसवंधुर्यमसवंधुर्न्निच
खानेदमहंतंवलगमुत्किरामियंमेसजातोयमस
जातोनिचखानोत्कृत्यांकिरामि ॥२३॥ स्वराडसिस
पत्नहासत्त्रराडस्यभिमातिहाजनराडसिरक्षोहास
र्वराडस्यमित्रहा ॥२४॥ रक्षोहणोव॥ रक्षोहणोवोव ५१

लगहनः प्रोक्षामिवैष्णवान्रक्षोहणोवोवलगहनोवन
यामिवैष्णवान्रक्षोहणोवोवलगहनोवस्तृणामिवै
ष्णवान्रक्षोहणौवांवलगहनाऽउपदधामिवैष्णवीर
क्षोहणौवांवलगहनौपर्यूहामिवैष्णवीवैष्णवमसि
वैष्णवास्थ॥२५॥देवस्यत्वा॥सवितुः प्रसवेश्विनोर्बा
हुभ्यांपूष्णोहस्ताभ्याम्॥आददेनार्यसीदमहꣳर

सं॰हि॰ क्षेस्मां ग्रीवाऽअपिद्धं तामि॥ यवोसियवयास्मद्वेषोजवया अ॰५
४२ रातीर्द्दिवेत्वांतरिक्षायत्वापृथिव्यैत्वाशुंधंतांलोकाःपि।
तृषदनाःपितृषदनमसि॥२८॥ उद्दिवंस्तभानांतरिक्षंपृणदृंहस्वपृथिव्यांद्युतानस्त्वामारुतोमि
नोतुमित्रावरुणोध्रुवेणधर्मणा॥ ब्रह्मवनित्वाक्षत्रवनि
रायस्पोषवनिपर्यूहामि॥ ब्रह्मदृंहक्षत्रंदृंहायुर्दृंह॰ ४२

हप्रजांदृꣳह॥२७॥ध्रुवासि॥ध्रुवोयंयजमानोस्मिंनायत
नेप्रजयापशुभिर्भूयात॥घृतेनद्यावापृथिवीपूर्येथामिं
द्रस्यछदिरसिविश्वजनस्यछाया॥२८॥परित्वा॥गिर्वणो
गिरइमाभवंतुविश्वतः॥वृद्धायुमनुवृद्धयोजुष्टाभवंतु
जुष्टयः॥२९॥इंद्रस्यस्यूः॥इंद्रस्यस्यूरसींद्रस्यध्रुवोसि
॥ऐंद्रमसिवैश्वदेवमसि॥३०॥विभूरसि॥प्रवाहणोव

संहि. ग्निरसिहव्यवाहनः॥ श्वात्रोसिप्रचेतास्तुथोसिविश्ववे अ.५
४३ दाऽउशिगसि॥३१॥उशिगसि॥ कविरंघारिरसिबंभारि
रवस्यूरसिदुवस्वांछुंधूरसिमार्जालीयः॥ सम्राडसि।
कृशानुःपरिषद्योसिपवमानोनभोसिप्रतक्वामृष्टोसि
हव्यसूदनऽऋतधामासिस्वर्ज्योतिः॥३२॥ समुद्रोसिवि
श्वव्यचाऽअजोस्येकपादहिरसिबुध्न्योवागस्यैंद्रमसि ४३

सदोसितस्यद्वारौमामासंताप्तमध्वनामध्वपतेप्रमातिर
स्वस्तिमेस्मिन्पथिदेवयानेभूयान्मित्रस्यमा ॥३३॥ मित्र।
स्यमा ॥ चक्षुषेक्षध्वमग्नयःसगराःसगरास्थसगरेण
नाम्नारौद्रेणानीकेनपातमाग्नयःपिपृतमाग्नयोगो
पायतमानमोवोस्तुमामाहिंसिष्ट ॥३४॥ ज्योतिर
सि ॥ विश्वरूपंविश्वेषांदेवानांसमित्त्वंसोमत

सं.हि. नूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यःऽउरुयंतासिवरूथंस्वा अ.५
४४ हाजुषाणोऽअप्तुराज्यस्यवेतुस्वाहा॥३५॥ शतम्॥२००॥ अ
ऽअग्नेनय॥ सुपथारायेऽअस्मान्विश्वानिदेववयुनानि
द्विद्वान्॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमऽउ
क्तिंविधेम॥३६॥ अयंनः॥ अयंनोऽअग्निर्वरिवस्कृ
णोत्वयंमृधःपुरएतुप्रभिंदन्॥ अयंवाजांजयतुवा ४४

जसातावयꣳ शत्रूञ्जयतुजर्हृषाणः स्वाहा॥ ३७॥ उरुवि
ष्णो॥ विक्रमस्वोरुक्षयायनः स्कृधि॥ घृतंघृतयोनेपिब
प्रप्रयज्ञपतिंतिरस्वाहा॥ ३८॥ देवसवितः॥ देवसवितरे
षतेसोमस्तꣳ रक्षस्वमात्वादभन्॥ एतत्त्वंदेवसोमदे।
वोदेवाꣳ॥ उपागा॥ इदमहंमनुष्यान्त्सहरायस्पोषेण
स्वाहानिर्वरुणस्यपाशान्मुच्ये॥ ३९॥ अग्नेव्रतपाः॥

सं॰हि॰य अग्ने व्रतपास्त्वे व्रतपा या तव तनूर्मय्यभूदेषा सा त्वयि यो । अ॰५
४५ मम तनूस्त्वय्यभूदियं सा मयि । यथायथं नौ व्रतपते व्र
तान्यनु मे दीक्षां दीक्षापतिरमंस्तानु तपस्तपस्पतिः ॥
४१ ॥ उरु विष्णो ॥ विक्रमस्वोरु क्षयाय नस्कृधि ॥ घृतं घृत
योने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥ ४२ ॥ अत्यन्यान् ॥ अ
त्यन्यां३ ऽ अगां नान्यां३ ऽ उपागामर्वाक्त्वा परेभ्यो ४५

ब्विदं परो वरेभ्यः॥ तं त्वा जुषामहे देव ब्वनस्पते देवयज्यायै

देवास्त्वा देवयज्यायै जुषंतां ब्विष्णवे त्वा॥ ओषधे त्राय

स्व स्वधिते मैनꣳ हिꣳसीः॥४२॥ द्यां मा लेषीरंतरिक्षं

मा हिꣳसीः पृथिव्या सं भव॥ अयꣳ हि त्वा स्वधिति

स्तेतिजानः प्रणिनाय महते सौभगाय॥ अतस्त्वं देव

ब्वनस्पते शतब्वल्शो ब्विरोह सहस्रब्वल्शा ब्वि ब्वयꣳ

संहि· ९६

रुहेम॥४३॥ इति वाजसनेयिसंहितायांपंचमोध्यायः॥ देवस्य अ·५
त्वा॥ सवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामा॥ आ
ददेनार्यसीदमहꣳरक्षसांग्रीवा अपिकृंतामि॥ यवोसियव
यास्मद्द्वेषोयवयारातीर्दिवेत्वांतरिक्षायत्वापृथिव्यैत्वाशुं
धंतांलोकाःपितृषदनाःपितृषदनमसि॥१॥ अग्रेणीर
सि॥ स्वावेशउन्नेतृणामेतस्यवित्तादधित्वास्थास्यतिदे ९६

वस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः ॥ द्या
मग्रेणास्पृक्ष ऽआन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणा
दृꣳहीः ॥ या ते धामान्युश्मसि गमध्यै यत्र गावो भूरि
शृङ्गा ऽअयासः ॥ अत्राह तदुरुगायस्य विष्णोः परमं प
दमवभाति भूरि ॥ ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि
पर्यूहामि ॥ ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह

संहि० ॥ ३ ॥ विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे ॥ इंद्रस्य अ० ६
४१ युज्यः सखा ॥ ४ ॥ तद्विष्णोः परमं पदꣳ सदा पश्यंति सूरयः
॥ दिवीव चक्षुराततम् ॥ ५ ॥ परिवीरसि ॥ परि त्वा दैवीर्विशो व्य
यंतां परीमं यजमानꣳ रायो मनुष्याणाम् ॥ दिवः सूनुर
स्येष ते पृथिव्यां लोक आरण्यस्ते पशुः ॥ ६ ॥ उपावीरसि
उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमा ४१

नः॥ देवस्त्वष्टर्वसुरम हव्या ते स्वदन्ताम॥७॥ रेवतीरमध्वम॥ रेव
तीरमध्वं बृहस्पते धारया वसूनि॥ ऋतस्य त्वा देवहविः पा
शेन प्रतिमुञ्चामि धर्षा मानुषः॥८॥ देवस्य त्वा सवितुः प्र
सवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम॥ अग्निषोमाभ्यां
जुष्टं नियुनज्मि॥ अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यताम
नु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः॥ अग्नीषोमा

संहि·
४८

मांत्वाजुष्टंप्रोक्षामि ॥ ९ ॥ अपांपेरुः ॥ अपांपेरुरस्यापोदे अ·६
वीःस्वदंतुस्वात्तंचित्सद्देवहविः ॥ संतेप्राणोवातेनगच्छ
ताꣳसमंगानियजत्रैः संयज्ञपतिराशिषा ॥ १० ॥ घृते
नाक्तौ ॥ पशूंस्त्रायेथाꣳरेवतियजमानेप्रियंधाऽआवि
श ॥ उरोरंतरिक्षात्सजूर्देवेनवातेनास्यहविषस्त्मनाय
जसमस्यतन्वाभव ॥ वर्षोवर्षीयसियज्ञेयज्ञपतिंधाःस्वा ४८

ह्वा देवेभ्यो देवेभ्यः स्वाहा ॥११॥ मा हिः॥ माहिर्भूर्मापृदाकु
र्नमस्तऽआतानानर्वाप्रेहि॥ घृतस्य कुल्याउपऽऋतस्यप
थ्याऽअनु ॥१२॥ देवीरापः॥ शुद्धावोढ्वं सुपरिविष्टा देवेषु
सुपरिविष्टा वयंपरिवेष्टारो भूयास्म ॥१३॥ वाचंते॥ शुंधा
मि प्राणंते शुंधामि चक्षुस्ते शुंधामि श्रोत्रंते शुंधामि नाभिं
ते शुंधामि मेढ्रंते शुंधामि पायुंते शुंधामि चरित्रांस्ते शुंधा

सं॰हि॰
५९

मि॥२४॥मनस्तेमनस्त्तऽआप्प्यायतांवाक्त्तऽआप्प्यायतांप्राण अ॰ ६
स्त्तऽआप्प्यायतांचक्षुस्त्तऽआप्प्यायतांश्श्रोत्रंत्तऽआप्प्याय
ताम्॥यत्तेक्रूरंयदास्थितंतत्तऽआप्प्यायतांनिष्ट्यायतांत
त्तेशुद्ध्यतुशमहोब्भ्यः॥ओषधेत्त्रायस्वस्वधितेमैनꣳहिꣳ
सीः॥२५॥रक्षसाम्भागोसि॥रक्षसाम्भागोसिनिरस्तꣳरक्षऽइ
दमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳ ५९

रक्षोधमंतमोनयामि॥ घृतेनद्यावापृथिवीप्रोर्णुवाथां॥
वायोवेस्तोकानामग्निराज्यस्यवेतुस्वाहास्वाहाकृतेऊ
र्ध्वनभसंमारुतंगच्छतम॥१६॥ इदमापः॥ प्रवहतावद्यंच
मलंचयत॥ यच्चाभिदुद्रोहानृतंयच्चशेपेऽभीरुणम
आपोमातस्मादेनसः पवमानश्चमुंचतु॥१७॥ संते॥ संते
मनोमनसासंप्राणःप्राणेनगच्छताम॥ रेडस्यग्निष्ट्वाश्री

सं.हि.६
५५

णात्वापस्त्वासमरिष्टंन्वातस्यत्वाधक्षजैघृत्स्मोरथं त्वाऽनुषम

णोव्यथिषत्वयुतंद्वेष॥ १८॥ घृतं घृतपावानः॥ पिबतवसां

वसापावानः॥ पिबतांतरिक्षस्यहविरसिस्वाहा॥ १९॥ इंद्र

प्राणः॥ ऐंद्रः प्राणोऽअंगेऽअंगे निदीध्यदैंद्रउदानोऽअं

गेअंगेनिधीतः॥ देवत्वष्टर्भूरितेसंसंसमेतुसलक्ष्माय

द्विषुरूपंभवाति॥ देवत्रायंतमवसेसखायोनुत्वामाता।

[illegible]

५५

पितरोमदंतु।२०।समुद्रंगच्छस्वाहांतरिक्षंगच्छस्वाहादे
वꣳसवितारंगच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरा
त्रेगच्छस्वाहाछंदाꣳसिगच्छस्वाहाद्यावापृथिवीगच्छस्वा
हायज्ञंगच्छस्वाहासोमंगच्छस्वाहादिव्यंनभोगच्छस्वाहा
ग्निंवैश्वानरंगच्छस्वाहामनोमेहार्दियच्छदिवंतेधूमोग
च्छतुस्वर्ज्योतिःपृथिवींभस्मनापृणस्वाहा।२१।मापः।

सं॰हि॰ मापोमोषधीर्हिंᳪसीर्धाम्नोधाम्नोराजंस्ततोवरुणनोमुंच अ॰ ६
५२ ॥यदाहुरघ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुं
च॥सुमित्रियानऽआपऽओषधयःसंतुदुर्मित्रियास्त
स्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः॥२२॥हविष्मतीरिमा
॥हविष्मतीरिमाऽआपोहविष्मांऽआविवासति॥हवि
ष्मांदेवोऽअध्वरोहविष्मांऽअस्तुसूर्यः॥२३॥अग्ने ५२

र्यः॥ अग्नेर्वोपंनगृहस्यसदसिसादयामींद्राग्न्योर्भाग
धेयीस्थमित्रावरुणयोर्भागधेयीस्थविश्वेषांदेवानां
भागधेयीस्थ॥ अमूर्याउपसूर्येयाभिर्वासूर्यःसह
तानोहिंन्वंत्वध्वरम्॥२४॥ हृदेत्वा॥ मनसेत्वादिवेत्वासू
र्यायत्वा॥ ऊर्ध्वमिममध्वरंदिविदेवेषुहोत्रायछ॥२५॥
सोमराजन्॥ सोमराजंन्विश्वास्त्वंप्रजाउपावरोहवि

श्वास्त्वांप्रजाऽनुपावंरोहंतु॥ शृणोत्वग्निःसमिधाहवं
मेशृण्वंत्वापोधिषणाश्चदेवीः॥ श्रोताग्रावाणोविदु
षोनयज्ञंशृणोतुदेवः सविताहवंमेस्वाहा॥२६॥देवी
रापः॥ देवीरापोऽअपांनपाद्योवऽऊर्मिर्हविष्यइंद्रिया
वान्मदिंतमः॥ तंदेवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषांभा
गस्थस्वाहा॥२७॥ कार्षिरसि॥ समुद्रस्यत्वाक्षित्याऽउंन्न।

यामि॥ समापोऽअद्भिरग्मत समोषधीभिरोषधीः॥ २८॥
यमग्ने॥ पृत्सु मर्त्यमवावाजेषु यंजुनाः॥ सयंताशाश्व
तीरिषः स्वाहा॥ २९॥ देवस्यत्वा॥ सवितुः प्रसवेऽश्विनोर्बा
हुभ्यांपूष्णो हस्ताभ्याम्॥ आददेरावासि गभीरमिममध्वरं
कृधीन्द्राय सुषूतमम्॥ उत्तमेन पविनोर्ज्जस्वंतं मधुमंतंप
यस्वंतं निग्राभ्या स्थ देवश्रुतस्तर्पयत मा मनो मे॥ ऽर्पंम।

संहि॰ नंमे॥ तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पय। अ॰ ६
५३ त श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे।
तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्॥ ३४॥ इन्द्राय
त्वा॥ वसुमते रुद्रवत इन्द्राय त्वादित्यवत इन्द्राय त्वाभिमा
तिघ्ने॥ श्येनाय त्वा सोमभृते ऽग्नये त्वा रायस्पोषदे॥ ३५॥
यत्ते॥ सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे तेना ५३

स्मे यजमानायोरु रायेकृध्यधि दात्रे वोचः ॥ ३३ ॥ श्वात्रा

स्थ वृत्रतुरो राधोगूर्त्ताऽअमृतस्य पत्नीः ॥ ता देवीर्देव

त्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ॥ ३४ ॥ मा भेर्मा

संविक्थाऽऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथा

मूर्जं दधाथाम् ॥ पाप्मा हतो न सोमः ॥ ३५ ॥ प्रागपाक ॥

प्रागपागुदगधराक्सर्वतस्त्वा दिशऽआधावंतु ॥ अंबनि

सं॰हि॰ ष्मारस्मसमरीर्विदाम॥३६॥त्वमंग॥प्रशंसिषोदेवःशवि अ॰६
५४ ष्ठमर्त्यम॥नत्वदन्योमघवन्नस्तिमर्डितेंद्रब्रवीमितेवचः
॥३७॥इतिवाजसनेयीसंहितायांषष्ठोध्यायः॥वाचस्प
तये॥पवस्ववृष्णोअंशुभ्यांगभस्तिपूतः॥देवोदेवेभ्य
ःपवस्वयेषांभागोसि॥मधुमतिर्न्नः॥मधुमतीर्नऽइ
षस्कृधियत्तेसोमादाभ्यंनामजागृवितस्मैतेसोम ५४

सोमायस्वाहास्वाहोर्वंतरिक्षमन्वेमिस्वांकृतोसि॥२॥स्वां
कृतोसिविश्वेभ्यः इंद्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमनं
स्त्वाष्टुस्वाहात्वासुभवसूर्यायदेवेभ्यस्त्वामरीचिपेभ्यो
देवांशोयस्मैत्वेडेतत्सत्यमुपरिप्रुताभंगेनहतोसौफ
ट्प्राणायत्वाव्यानायत्वा॥३॥उपयामगृहीतोसि॥उपया
मगृहीतोस्यंतर्यछमघवन्पाहिसोमम्॥उरुष्यरायएषो

संहि॰ यजस्व॥ ४॥ अंतस्ते॥ द्यावापृथिवीदधाम्यंतर्दधाम्युर्वंतरि अ॰ ७
५५ क्षम॥ सजूर्देवेभिरवरैः परैश्चांतर्यामेमघवन्मादयस्व॥ ५
स्वांकृतोसि॥ विश्वेभ्यः इंद्रियेभ्योदिव्येभ्यः पार्थिवेभ्योम
नस्त्वाष्टुस्वाहात्वासुभवसूर्यायदेवेभ्यः स्त्वामरीचिपे
भ्यः उदानायत्वा॥ ६॥ आवायो॥ भूषशुचिपाउपनः सह
स्रंतेनियुतोविश्ववार॥ उपोते अंधोमद्यमयामिय॥ ५५

स्यदेवदधिषेपूर्वपेयंवायवेत्वा॥७॥इंद्रवायूइमे॥सुताउ
पप्रयोभिरागतम॥इंदवोवामुशंतिहि॥उपयामगृहीतो
सिवायवइंद्रवायुभ्यांत्वैषतेयोनिः॥सजोषोभ्यांत्वा॥
८॥अयंवां॥मित्रावरुणासुतःसोमऋतावृधा॥ममे
दिहश्रुतंहवम॥उपयामगृहीतोसिमित्रावरुणाभ्यां
त्वा॥९॥रायावयम॥रायावयंससवांसोमदेमह

सं.हि. व्येन देवा यवसेन गावः॥ तां धेनुं मित्रावरुणा युवन्नो विश्वा अ.७
५६ हा धत्तमनपस्फुरन्तीमेष ते योनिर्ऋतायुभ्यां त्वा॥१०॥ या
वाम्॥ या वां कशा मधुमत्यश्विना सूनृतावती॥ तया यज्ञं
मिमिक्षतम्॥ उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वी
भ्यां त्वा॥११॥ तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठता
तिं बर्हिषदꣳ स्वर्विदम्॥ प्रतीचीनं वृजनं दोहसे धुनिं ५६

माशुंजयंतमनुयासुवर्द्धसि ॥ उपयामगृहीतोसिशंडायत्वै
षतेयोनिर्वीरतांपाह्यपमृष्टः शंडोदेवास्त्वाशुक्रपाःप्र
णयंत्वनाधृष्टासि ॥ १२ ॥ सुवीरोवीरान् ॥ सुवीरोवीरान्प्र
जनयन्परीह्यभिरायस्पोषेणयजमानम् ॥ संजग्मानो
दिवापृथिव्याशुक्रः शुक्रशोचिषानिरस्तः शंडः शुक्र
स्याधिष्ठानमसि ॥ १३ ॥ अछिन्नस्यतेदेवसोमसुवीर्य ॥

संहि॰ स्यरायस्पोषस्यदद्दितारःस्याम॥साप्रथमासंस्कृतिर्व्विश्व अ॰ ७
५१ वारासप्रथमोवरुणोमित्त्रोऽअग्निः॥१४॥सप्रथमाः॥स
प्रथमोबृहस्पतिश्चिकित्वांस्तस्माऽइंद्रायसुतमाजुहो
तस्वाहा॥तृपंतुहोत्रामध्वोयाःस्विष्टायाःसुप्रीताःसुहु
तायत्स्वाहायाडग्नीत्॥१५॥अयंवेनः॥अयंवेनश्चो
दयत्पृश्निगर्ब्भाज्ज्योतिर्जरायूरजसोविमाने॥इमम॥ ५१

पाथः संगमे सूर्यस्य विष्णुर्न विश्वामतिर्चीरिहंति ॥ उप ।
यामगृहीतोसि मर्कायत्वा ॥ १६ ॥ मनो न ॥ येषु हवनेषु ।
तिग्मं विपः शच्या वनुथो द्रवंता ॥ आयुः शर्य्याभिस्तु ।
विनृम्णो ऽ अस्याश्रीणीतादिशं गभस्तावेष ते योनिः
प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा मंथिपाः प्रणयंत्व
नाधृष्टासि ॥ १७ ॥ सुप्रजाः प्रजाः प्रजनयंन्परीह्य ।

संहि॰ य

५८

निरस्तोषेणा यजमानम॥ सं जग्मानो दिवा पृथिव्या। अ॰७

मंथी मंथिशोचिषा निरस्तो मर्को मंथिनोधिष्ठानमसि॥

१८॥ ये देवास॥ ये देवासो दिव्येकादशस्थ पृथिव्याम

ध्येकादशस्थ॥ अप्सुक्षितो महिनैकादशस्थ ते देवा

सो यज्ञमिमं जुषध्वम॥ १९॥ उपयामगृहीतोसि॥ उपया

मगृहीतोस्याग्रयणोसि स्वाग्रयणः॥ पाहि यज्ञं पाहि ५८

यज्ञपतिंविष्णुस्त्वामिंद्रियेणपातुविष्णुंत्वंपाह्यभिसव
नानिपाहि॥२०॥सोमःपवतेसोमःपवतेस्मैब्रह्मणेस्मै
क्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऽऊर्ज्जेपव
तेद्भ्यऽओषधीभ्यःपवतेद्यावापृथिवीभ्यांपवतेसुभू
तायपवतेविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्य
स्त्वादेवेभ्यः॥२१॥उपयामगृहीतोसी॥उपयामगृही

सं॰हि॰
५१

तोसीन्द्रायत्वा बृहद्वते वयस्वतऽउक्थाव्यं गृह्णामि। यत्तऽइन्द्र अ॰ ७
बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा।
देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि मित्रावरुणा
भ्यां त्वा ॥ २२ ॥ मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृ
ह्णामीन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राग्निभ्यां॥
त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवा। ५१

व्यंयज्ञस्यायुषेगृह्णामींद्राबृहस्पतिन्मांत्वादेवाव्यंय
ज्ञस्यायुषेगृह्णामींद्राविष्णुमांत्वादेवाव्यंयज्ञस्यायु
षेगृह्णामि॥२३॥मूर्द्धानंदिवः॥मूर्द्धानंदिवोअरतिंपृ
थिव्यावैश्वानरमृतआजातमग्निम॥कविंसम्रा
जमतिथिंजनानामासन्नापात्रंजनयंतदेवाः॥२४॥
उपयामगृहीतोसि॥ध्रुवोसिध्रुवक्षितिर्ध्रुवाणां॥

सं.हि. ध्रुवतमोच्युतानामच्युतक्षित्तमएषतेयोनिर्वैश्वानराय ॥ अ.७
६६ त्वा ॥ ध्रुवंध्रुवेणमनसावाचासोममवनयामि ॥ अथान
इंद्रइद्विशोसपत्नाःसमनसस्करत ॥ २५ ॥ यस्तेद्रप्स
स्कंदति ॥ यस्तेअंशुर्ग्रावच्युतोधिषणयोरुपस्थात ॥
अध्वर्योर्वापरिवायःपवित्रात्तंतेजुहोमिमनसावषट्कृ
तंस्वाहादेवानामुत्क्रमणमसि ॥ २६ ॥ प्राणायमे ॥ व ६६

र्च्चोदावर्च्चसेपवस्वव्यानायमेवर्च्चोदावर्च्चसेपवस्वोदाना।
यमेवर्च्चोदावर्च्चसेपवस्ववाचेमेवर्च्चोदावर्च्चसेपवस्वक्रतू
दक्षाभ्यांमेवर्च्चोदावर्च्चसेपवस्वश्रोत्रायमेवर्च्चोदावर्च्चसे
पवस्वचक्षुर्भ्यांम्मेवर्च्चोदासौवर्च्चसेपवेथामात्मनेमे॥२७
आत्मनेमेवर्च्चोदावर्च्चसेपावस्वौजसेमेवर्च्चोदावर्च्चसे।
२ पस्वायुषेमेवर्च्चोदावर्च्चसेपवस्वविश्वाभ्योमेप्रजाभ्योव

संहि॰ र्व्वोदसौ वर्व्वसे पवेथाम॥२८॥ कोसि कतमोसि कस्यासि को अ॰ ७
६२ नामासि॥ यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम॥ भू
र्भुवः स्वः सुप्रजाः प्रजाभिः स्याꣳ सुवीरो वीरैः सुपोषः
पोषैः॥२९॥ उपयामगृहीतोसि मधवे त्वोपयामगृहीतो
सि माधवाय त्वोपयामगृहीतोसि शुक्राय त्वोपयामगृ
हीतोसि शुचये त्वोपयामगृहीतोसि नभसे त्वोपयाम ६२

गृहीतोसिनभस्यायत्वोपयामगृहीतोसीषेत्वोपयाम
गृहीतोस्यूर्जेत्वोपयामगृहीतोसिसहसेत्वोपयामगृ।
हीतोसिसहस्यायत्वोपयामगृहीतोसितपसेत्वोपया
मगृहीतोसितपस्यायत्वोपयामगृहीतोस्यꣳहसस्प।
तयेत्वा॥३०॥इंद्राग्नीऽआगतम॥इंद्राग्नीऽआगतꣳ।
सुतंगीर्भिर्नभोवरेण्यम॥अस्यपातंधियेषिता॥उपया

सं.हि. मगृहीतोसिंद्राग्निभ्यांत्वैषतेयोनिरिंद्राग्निभ्यांत्वा॥ अ.७

६२ ३१॥ आघायेऽआघायेऽअग्निमिंधतेस्तृणंतिबर्हिरानु

षक॥ येषामिंद्रोयुवासखा॥ उपयामगृहीतोस्यग्नींद्रा॥

भ्यांत्वैषतेयोनिरग्नींद्राभ्यांत्वा॥३२॥ ॐमासश्चर्षणी

मं ५ ॥ धृतोविश्वेदेवासआगत॥ दाश्वांसोदाशुषः सुतम

॥उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यः एषतेयो॥ ६२

निर्विश्वेभ्यस्त्वादेवेभ्यः॥३३॥ विश्वेदेवासः॥ विश्वेदेवास

आगतश्रृणुतामऽइमꣳहवम्। एदंबर्हिर्निषीदत॥ उप

यामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वे

भ्यस्त्वादेवेभ्यः॥३४॥ इंद्रमरुत्वः॥ इंद्रमरुत्वऽइहपाहि

सोमंयथाशार्यातेऽअपिबःसुतस्य॥ तवप्रणीतीतवशूर

शर्मन्नाविवासंतिकवयःसुयज्ञाः॥ उपयामगृहीतो

संहि॰ सींद्रायत्वामरुत्वतऽएषतेयोनिरिंद्रायत्वामरुत्वते ॥ ३५ ॥ अ॰ ७
६३ मरुत्वंतंवृषभंवावृधानमकवारिंदिव्यꣳशासमिंद्रम्
विश्वासाहमवसेनूतनायोग्रꣳसहोदामिहतꣳहुवेम
उपयामगृहीतोसींद्रायत्वामरुत्वतऽएषतेयोनिरिंद्रा
यत्वामरुत्वते ॥ उपयामगृहीतोसिमरुतांत्वौजसे ॥ ३६ ॥
सजोषाऽइंद्र ॥ सगणोमरुद्भिः सोमंपिबवृत्रहाशूरविद्वा ६३

न॥जहिशत्रूं३ँरपमृधोनुदस्वाथाभयंकृणुहिविश्वतो
नः॥उपयामगृहीतोसींद्रायत्वामरुत्वतऽएषतेयोनिरिंद्रा
यत्वामरुत्वते॥३५॥मरुत्वां३ँइंद्रवृषभोरणायपिबा
सोममनुष्वधंमदाय॥आसिंचस्वजठरेमध्वऊर्मिंत्व
ठं राजासिप्रदिवःसुतानाम॥उपयामगृहीतोसींद्राय
त्वामरुत्वतऽएषतेयोनिरिंद्रायत्वामरुत्वते॥३६॥महा

संहि॰ ६४

ꣳऽइंद्रः॥ महाꣳऽइंद्रोनृवदाचर्षणिप्राऽउतद्विवर्हाऽअ॥ अ॰७
मिनः सहोभिः॥ अस्मद्र्यग्वावृधेवीर्यायोरुः पृथुः सुकृ
तः कर्तृभिर्भूत्॥ उपयामगृहीतोसिमहेंद्रायत्वैषतेयो॥
निर्महेंद्रायत्वा॥ ऊर्ध्वं॥ महाꣳऽइंद्र॥ महाꣳऽइंद्रोयऽ
ओजसापर्ज्जन्योवृष्टिमाꣳऽइव॥ स्तोमैर्वत्सस्यवावृधे
॥ उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनिर्महेंद्रायत्वा॥ ६४

४०॥ उदुत्यं॥ जातवेदसंदेवंवहंतिकेतवः॥ दृशेविश्वाय॥
सूर्य्यꣳस्वाहा॥ ४१॥ चित्रंदेवानाम्॥ चित्रंदेवानामुदगाद
नीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीऽ
अंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्चस्वाहा॥ ४२॥
अग्नेनय॥ सुपथाराये ऽअस्मान्विश्वानिदेववयुनानिवि
द्वान॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमऽउक्तिं।

संहि॰ द्विधेमस्वाहा॥४४॥अयंनः॥अयंन्नोऽअग्निर्वरिवस्कृणो अ॰७
६५ त्वयंमृधः पुरएतुप्रभिंदन्॥अयंवाजांजयतुवाजसाता
वयर्ठं शत्रूंजयतुजर्हृषाणः स्वाहा॥४५॥रूपेणवः॥रूपे
णवोरूपमभ्यागांतुथोवोविश्ववेदाविभजतु॥ऋतस्यप
थाप्रेतचंद्रदक्षिणाविस्वः पश्यव्यंतरिक्षंयतस्वसदस्यैः
॥४६॥अ॥ब्राह्मणमद्य॥विदेयंपितृमंतंपैतृमत्यमृषिमार्षेयर्ठं ६५

१

स्कधातुदक्षिणाम्॥ अस्मज्जातादेवत्वागच्छतप्रदातारमा
विशत॥४६॥ अग्नयेत्वा॥ मह्यंवरुणोददातुसोमृतत्वम
शीयायुर्दात्रएधिमयोमह्यंप्रतिग्रहीत्रेरुद्रायत्वाम॥
ह्यंवरुणोददातुसोमृतत्वमशीयप्राणोदात्रएधि
वयोमह्यंप्रतिग्रहीत्रेबृहस्पतयेत्वामह्यंवरुणोददा॥
तुसोमृतत्वमशीयत्वग्दात्रएधिमयोमह्यंप्रतिग्रही॥

सं०हि० येयमायत्वामह्यंवरुणोददातुसोमृतत्त्वमशीयायुर्दा श्री० ३
६६ त्रएधिमयोमह्यंप्रतिग्रहीत्रे ॥४७॥ कोदात्‌ ॥ कोदात्कस्माऽ
ऽदात्कामोदात्कामायादात्‌ ॥ कामोदाताकामःप्रतिग्र
हीताकामैतत्ते ॥४८॥ इतिवाजसनेयीसंहितायांसप्तमो
ध्यायः ॥ उपयामगृहीतोसि ॥ उपयामगृहीतोस्यादित्येभ्य
स्त्वा ॥ विष्णऽउरुगायैषतेसोमस्तꣳरक्षस्वमात्वादभन्‌ ६६

॥ १ ॥ कदाचन ॥ स्तरीरसि नेंद्र सश्चसि दाशुषे ॥ उपोपेंनु म-
घवन्भूयइन्नुते दानं देवस्य पृच्यते ॥ आदित्येभ्यस्त्वा ॥ २ ॥
कदाचन ॥ प्रयुछस्युभे निपासि जन्मनी ॥ तुरीयादित्यस-
वनंतइंद्रियमातस्थावमृतं दिवि आदित्येभ्यस्त्वा ॥ ३ ॥ यज्ञो
देवानाम् ॥ प्रत्येति सुम्नमादित्यासो भवतामृडयंतः ॥ आ
वोर्वाची सुमतिर्ववृत्यादंहोश्चिद्यावरिवोवित्तरासदा

संहि· दिसेन्मस्त्वा ॥४॥ विवस्वंनादित्स विवस्वंनादित्यैषतेसोम श्री·ग
६७ पीथस्तस्मिंन्मत्स्व ॥ श्रदस्मैनरोवचसेदधातनयदाशीर्दा
दंपतीवाममश्नुतः ॥ पुमान्पुत्रोजायतेविंदतेवस्वधावि
श्वाहारपएधतेगृहे ॥ ५ ॥ वाममद्यसवितर्वाममुश्वोदि
वेदिवेवाममस्मभ्यंसावीः ॥ वामस्यहिक्षयस्यदेवभू
रेरयाधियावामभाजःस्याम ॥ ६ ॥ नपयामगृहीतोसि ॥ ६७

॥ सावित्रो ऽसि चनोधाश्चनोधा ऽअसि चनो मयि धेहि ॥ जिन्व य
ज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥ ७ ॥ म्नातम् ॥ ३०० ॥
उपयामगृहीतोसि ॥ सुशर्म्मासि सुप्रतिष्ठानो बृहदुक्षाय
नमः ॥ विश्वेभ्यस्त्वा देवेभ्य ऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य
ः ॥ ८ ॥ उपयामगृहीतोसि ॥ बृहस्पतिसुतस्य देव सोम तऽइं
दोरिंद्रियावतः पत्नीवतो ग्रहाँ ऽऋध्यासम् ॥ अहं पर

संहि.
६८

स्तादृंहमवस्ताद्दृंहदंतरिक्षंतदुमेपिताभूत ॥ अहꣳ सूर्यमु अ. ८
भयतोददर्शाहंदेवानांपरमंगुहायत ॥ ९ ॥ अग्ना ३ऽ इप
त्नीवन ॥ अग्ना ३ऽ इपत्नीवंत्सजूर्देवेनत्वष्ट्रासोमंपिब ॥
स्वाहा ॥ प्रजापतिर्वृषासिरेतोधारेतोमयिधेहिप्रजापते
स्तेवृष्णोरेतोधसोरेतोधामशीय ॥ १० ॥ उपयामगृहीतोसि
॥ हरिरसिहारियोजनोहरिभ्यांत्वा ॥ हर्योर्धानास्थसह ॥ ६८

सोमाऽइंद्राय ॥ २४ ॥ यस्ते ॥ अश्वसनिर्भक्षो यो गोसनि॥

स्तस्य तऽइष्टयजुषस्तुतस्तोमस्य ॥ शस्तोक्थस्योपहू

तस्योपहूतो भक्षयामि ॥ २४ ॥ देवकृतस्यैनसः ॥ देवकृ

तस्यैनसोव्वयजनमसि मनुष्यकृतस्यैनसोव्वयज

नमसि पितृकृतस्यैनसोव्वयजनमस्यात्मकृतस्यैनसो

व्वयजनमस्येनसऽएनसोव्वयजनमसि ॥ यच्चाहमेनो ।

सं॰हि॰ विश्वांश्चकारयश्चाविद्वांस्तस्यसर्वस्यैनसोवयजनमसि श्र॰॰

६९ ॥२३॥ संवर्च्चसा॥ पयसासंतनूभिरगन्महिमनसासᳫ॥

शिवेन॥ त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्वि

लिष्टम्॥२४॥ समिद्धोग्नोमनसानेषिगोभिःसᳫसू

रिभिर्मघवंत्सᳫ स्वस्त्या॥ संब्रह्मणादेवकृतंयदस्ति

संदेवानाᳫ सुमतौयज्ञियानाᳫ स्वाहा॥२५॥ संवर्च ६९

सा॥ पयसा संतनुभिरगन्महि मनसा सꣳ शिवेन॥ त्वष्टा
सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम्॥ २६॥ धा
ता रातिः॥ सवितेदं जुषंतां प्रजापतिर्निधिपा देवो ऽअ
ग्निः॥ त्वष्टा विष्णुः प्रजया सꣳ रराणा यजमानाय द्र
विणं दधात स्वाहा॥ २७॥ सुगा वं॥ सुगा वो देवाः सदना
ऽअकर्म य ऽआजग्मेदꣳ सवनं जुषाणाः॥ भरमाणा

संहि॰ व्वहमानाहवीꣳष्यस्मेधत्तव्वसवोव्वसूनिस्वाहा॥१८॥याꣳ२ऽ अ॰८
७८ आवहऽउशतोदेवदेवांस्तान्प्रेरयस्वेऽअग्नेसधस्थे॥
जक्षिवाꣳसःपपिवाꣳसश्चविश्वेसुंघर्मꣳस्वरातिष्ठ
तानुस्वाहा॥१९॥व्वयꣳहित्वा॥प्रयतियज्ञेऽअस्मिंन
ग्नेहोतारमवृणीमहीह॥ऋधगयाऽऋधगुताशमि
ष्ठाः॥प्रजानंन्यज्ञमुपयाहिविद्वांत्स्वाहा॥२०॥देवागा ७८

तुविदः।देवागातुविदोगातुंवित्वागातुमित।मनसस्पत
ऽइमंदेवयज्ञꣳस्वाहावातेधाः॥२१॥यज्ञयज्ञंगच्छयज्ञ
पतिंगच्छस्वांयोनिंगच्छस्वाहा।एषतेयज्ञोयज्ञपतेसह
सूक्तवाकः।सर्व्ववीरस्तंजुषस्वस्वाहा॥२२॥माहि
र्भूर्म्मापृदाकुः।उरुꣳहिराजावरुणश्चकारसूर्या
यपंथामन्वेतवाउ।अपदेपादाप्रतिधातवेकरुतापव

संहि॰ स्ताहृदयाविधश्चित॥नमोवरुणायाभिष्ठितोवरुण॥ अ॰८

७१ स्यपाशः॥२३॥अग्नेरनीकम्॥अग्नेरनीकमपःआविवे

शापांनपात्प्रतिरक्षंनसुर्यम्॥दमेदमेसमिधंयक्ष्यग्ने

प्रतितेजिह्वाघृतमुच्चरण्यत्स्वाहा॥२४॥समुद्रेते॥हृदय

मप्स्वंतःसंत्वाविशंत्वोषधीरुतापः॥यज्ञस्यत्वायज्ञप

तेसूक्तोक्तौनमोवाकेविधेमयत्स्वाहा॥२५॥देवीराप ७१

देवीराप ऽएषवोगर्भस्तꣳ सुप्रीतꣳ सुभृतंबिभृत॥दे
वसोमैषतेलोकस्तस्मिंञ्छंचवक्ष्वपरिचवक्ष्व॥२६॥अ
वभृथनिचुंपुण॥निचेरुरसिनिचुंपुणः॥अवदेवैर्देव
कृतमेनोयासिखमवमर्त्यैमर्त्यकृतंपुरुराव्णोदेवरि
खस्पाहिदेवानाꣳसमिदसि॥२७॥एजतुदशमास्यः॥
एजतुदशमास्योगर्भोजरायुणासह॥यथायंवायुरे

संहि॰ जति यथा समुद्र ऽएजति ॥ एवायं दशमास्यो ऽअस्रज्जरा अ॰ ८

७२ युणा सह ॥ २८ ॥ यस्यै ते यज्ञियो गर्भो यस्यै योनिर्हिरु

ण्ययी ॥ अङ्गान्यह्रुता यस्य तं मात्रा समजीगमं स्वा

हा ॥ २९ ॥ पुरुदस्मो विषुरूपः ॥ पुरुदस्मो विषुरूप

ऽइंदुरंतर्महिमानमानंज धीरः ॥ एकपदीं द्विपदीं त्रिप

दीं चतुष्पदीमष्टापदीं भुवनानु प्रथंतां स्वाहा ॥ ३० ॥ ७२

मरुतो यस्य हि क्षये पाथा दिवो विमहसः॥ स सुगोपा
तमो जनः॥ ३१॥ मही द्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्ष
ताम्॥ पिपृतान्नो भरीमभिः॥ ३२॥ आ तिष्ठ वृत्रहन्र
थं युक्ता ते ब्रह्मणा हरी॥ अर्वाचीनं सु ते मनो ग्रावा
कृणोतु वग्नुना॥ उपयामगृहीतोसीन्द्राय त्वा षोडशिन
ऽएष ते योनिरिन्द्राय त्वा षोडशिने॥ ३३॥ युक्ष्वा हि केशि

सं॰हि॰ नाहरीवृषणा कक्ष्यप्रा। अथानः इंद्रसोमपा गिरामुपश्रु अ॰८
५३ तिंचर। उपयामगृहीतोसींद्रायत्वाषोडशिनः एषतेयो
निरिंद्रायत्वाषोडशिने॥३४॥ इंद्रमित्। इंद्रमिद्धरीव
हतोप्रतिधृष्टशवसम्। ऋषीणांचस्तुतीरुपयज्ञंच
मानुषाणाम्। उपयामगृहीतोसींद्रायत्वाषोडशिनः एष
तेयोनिरिंद्रायत्वाषोडशिने॥३५॥ यस्मान्न। यस्मा। ५३

न्नजातःपरोऽअन्न्योऽअस्तियऽआविवेशभुवनानिविश्वा
श्वा॥प्रजापतिःप्रजयासꣳरराणस्त्रीणिज्योतीꣳषिस
चतेसषोडशी॥३६॥इन्द्रश्च॥सम्राड्वरुणश्चराजातौते
भक्षंचक्रतुरग्रऽएतम्।तयोरहमनुभक्षंभक्षयामिवा
ग्देवीजुषाणासोमस्यतृप्यतुसहप्राणेनस्वाहा॥३७॥अ
ग्नेपवस्व॥स्वपाऽअस्मेवर्चःसुवीर्यम्।दधद्रयिंमयिपो

संहि.
७६

षम॥उपयामगृहीतोस्यग्नयेत्वावर्च्चसऽएषतेयोनिरग्न अ.८
येत्वावर्च्चसे॥अग्नेवर्च्चस्विन्वर्च्चस्वांस्त्वंदेवेष्वसिवर्च्च।
स्वानहंमनुष्येषुभूयासम॥३८॥उत्तिष्ठन्नोजसासह।
पीत्वीशिप्रेऽअवेपयः॥सोममिंद्रचमूसुतम॥उपयाम
गृहीतोसींद्रायत्वौजसऽएषतेयोनिरिंद्रायत्वौजसे॥इं
द्रौजिष्ठौजिष्ठस्त्वंदेवेष्वस्योजिष्ठोहंमनुष्येषुभूयासम ७४

॥ ३९ ॥ अदृश्रमस्य । केतवो विरश्मयो जनाँ२ ॥ अनु ॥

भ्राजंतो अग्नयो यथा । उपयामगृहीतोसि सूर्याय ॥

त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय । सूर्य भ्रा

भ्राजिष्ठ जिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोहं मनुष्येषु भूयासम ॥ ४

० ॥ उदु त्यं । जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वा

य सूर्यम् । उपयामगृहीतोसि सूर्याय त्वा भ्राजायैष ते

ना २

संहि॰ योनिः सूर्याय ततान ॥ ४१ ॥ आजिघ्र कलशं मह्या त्वा अ॰ ८
७५ विशंत्विंदवः ॥ पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरु
धारा पयस्वती पुनर्म्मा विशताद्रयिः ॥ ४२ ॥ इडे रंते ह
व्ये काम्ये चंद्रे ज्योते दिति सरस्वति महि विश्रुति ॥ एता
ते ऽघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ॥ ४३ ॥ वि
नः ॥ विन इंद्र मृधो जहि नीचा यच्छ पृतन्यतः ॥ यो अस्मा ७५

स्माँ॥ऽअभिदासत्यधरंगमयातमः॥उपयामगृहीतो
सींद्रायत्वा विमृधे ऽएषतेयोनिरिंद्रायत्वा विमृधे॥४
४॥ वाचस्पतिंविश्वकर्माणमूतयेमनोजुवंवाजे ऽअ
द्यहुवेम॥सनोविश्वानिहवनानिजोषद्विश्वशं
भूरवसेसाधुकर्मा॥उपयामगृहीतोसींद्रायत्वाविश्व
कर्मण ऽएषतेयोनिरिंद्रायत्वाविश्वकर्मणे॥४५॥वि॥

सं.हि. श्वकर्मन्हविषा॥वर्द्धनेनत्त्रातारमिंद्रमकृणोरवध्यम् श्र.८
७६ ॥तस्मैविशः॥समनमंतपूर्वीरयमुग्रोविहव्योयथास
त्॥उपयामगृहीतोसींद्रायत्वाविश्वकर्मणऽएषते।
योनिरिंद्रायत्वाविश्वकर्मणे॥४६॥उपयामगृहीतोसि
॥उपयामगृहीतोस्यग्नयेत्वागायत्रछंदसंगृह्णामींद्रा
यत्वात्रिष्टुप्छंदसंगृह्णामिविश्वेभ्यस्त्वादेवेभ्योजग ७६

छंदसंगृहीताम्यनुष्टुभेनिगराः॥४७॥श्वेत्रीनांत्वा॥पत्मंना

धूनोमिकुकूननानांत्वापत्मंनाधूनोमिभंदनानांत्वा

पत्मंनाधूनोमि॥मदिंतमानांत्वापत्मंनाधूनोमिमधूं

तमानांत्वापत्मंनाधूनोमिशुक्रंत्वाशुक्रऽआधूनोम्य

न्होरूपेसूर्यस्यरश्मिषु॥४८॥ककुहंरूपं॥वृषभस्य

रोच्वतेबृहच्छुक्रः शुक्रस्यपुरोगाः सोमः सोमस्यपुरो

संहि॰ गा॰ ॥ यत्ते सोमादाभ्यंनाम जागृवितस्मै त्वागृह्णामितस्मैते श्रुः॰
७५ सोमसोमायस्वाहा ॥ धर्ष ॥ उन्निशित्स्वं ॥ देवसोमाग्नेः प्रि
यंपाथोपीहि त्वन्द्रीत्वंदेवसोमेंद्रस्यप्रियंपाथोपीत्त्व
स्मत्सखात्वंदे २ वसोमविश्वेषांदेवानांप्रियंपाथो
पीहि ॥ धर्ष ॥ इहरतिः ॥ इहरतिरिहरमध्वमिहधृतिरि
हस्वधृतिः स्वाहा ॥ उपसृजंधरुणंमात्रेधरुणोमात ७५

रुंधयन्। रायस्पोषमस्मासुदीधरत्स्वाहा॥५२॥ सत्रस्य
ऽऋद्धिः। सत्रस्य ऽऋद्धिरस्यगन्मज्योतिरमृताऽअभू
म। दिवंपृथिव्याऽअध्यारुहामाविदामदेवांत्स्वर्ज्यो
तिः॥५३॥ युवंतम्। युवंतमिंद्रापर्वतापुरोयुधायोनः
पृतन्यादपतंतमिद्धतंवज्रेणतंतमिद्धतम्। दूरेचत्ता
यच्छँत्सद्गहनंयदिनक्षत्। अस्माकंशत्रून्परि

संहि·

७८

शूरविश्वतोदर्मादर्षीष्टविश्वतः॥भूर्भुवःस्वःसुप्र अ·८
जाःप्रजाभिःस्यामसुवीरावीरैःसुपोषाःपोषैः॥५३॥
परमेष्ठ्यभिधीतः॥प्रजापतिर्वाचिव्याहृतायामंधो
ऽच्छेतःसवितासन्यांविश्वकर्मादीक्षायांपूषासो
मक्रयण्यामिंद्रश्च॥५४॥इंद्रश्चमरुतश्चक्रयायो
पोत्थितोऽसुरःपण्यमानोमित्रःक्रीतोविष्णुःशिपि ७८

विष्टऽऊरावासन्नोविष्णुर्नरंधिषःप्रोष्यमाणःसो
मः॥५५॥प्रोष्यमाणःसोमऽआगतोवरुणऽआसंद्या
मासन्नोग्निराग्नीध्रऽइंद्रोहविर्धानेथर्वोपावह्रिय
माणोविश्वेदेवाः॥५६॥विश्वेदेवाऽअंशुषुन्युप्तोवि
ष्णुराप्रीतपाऽआप्याय्यमानोयमःसूयमानोविष्णु
स्संभ्रियमाणोवायुःपूयमानःशुक्रःपूतःशुक्रः

संहि. क्षीरश्रीर्मन्थीसक्तुश्रीर्विश्वेदेवाः॥५७॥ विश्वेदेवाश्चमसे अ.८
७२ ष्वुन्नीतोसुरोहोमायोद्यतोरुद्रोहूयमानोवातोभ्यावृत्तो
नृचक्षाः प्रतिख्यातोभक्षोभक्ष्यमाणः पितरोनाराशं
साः सन्नः सिंधुः॥५८॥ सन्नः सिंधुरवभृथमुद्यतः
समुद्रोभ्यवह्रियमाणः सलिलः प्रप्लुतोययोरोजसा
स्कभितारजांसि वीर्येभिर्वीरतमाशविष्ठा॥ यापत्ये ७२

तेऽध्वर्यन्तीतासहोनिर्विविस्तुऽन्यगंन्वरुणापूर्वंहूतो ।

॥ परणे ॥ देवा दिवम ॥ देवांदिवमगंन्यज्ञस्ततोमाद्रविण

मष्टुमनुष्यानंतरिक्षमगंन्यज्ञस्ततोमाद्राविणमष्टुपि

तॄन्पृथिवीमगंन्यज्ञस्ततोमाद्रविणमष्टुयंकंचलोक

मगंन्यज्ञस्ततोमेभद्रमभूत ॥ ६० ॥ चतुस्त्रिꣳ॰शान्तेतवः

॥ चतुस्त्रिꣳ॰शान्तंतवोयेवितत्निरेयऽइमंयज्ञꣳस्वध ।

संहि॰
८४

यादद्देते ॥ तेषांछिन्नꣳसंम्वेतद्दधामिस्वाहा घर्म्मोऽत्र अ॰ ८

मेतुदेवान् ॥ ६१ ॥ यज्ञस्यदोह ॥ यज्ञस्यदोहोविततः पु

रुत्रासोऽअष्टधादिवमन्वाततान ॥ सयज्ञधुक्ष्वमहि

मेप्रजायाꣳरायस्पोषंविश्वमायुरशीयस्वाहा ॥ ६२ ॥

आपवस्व ॥ हिरण्यवदश्ववत्सोमवीरवत ॥ वाजंगोम

न्तमाभरस्वाहा ॥ ६३ ॥ इतिवाजसनेयीसंहितायामष्ट ८४

मोध्याय:॥ देवसवितः॥ देवसवितःप्रसुवयज्ञंप्रसुवय
ज्ञपतिंभगाय॥ दिव्योगंधर्वःकेतपूःकेतन्नःपुनातुवा
चस्पतिर्वाजन्नःस्वदतुस्वाहा॥१॥ ध्रुवसदंत्वा॥ नृषदं
मनःसदमुपयामगृहीतोसींद्रायत्वाजुष्टंगृह्णाम्येष
तेयोनिरिंद्रायत्वाजुष्टतमम॥ अप्सुषदंत्वाघृतसदं
व्योमसदमुपयामगृहीतोसींद्रायत्वाजुष्टंगृह्णाम्ये

संहि०
८१

षतेयोनिरिंद्रायत्वाजुष्टतमम्॥२॥पृथिविसदंत्वांतरिक्षसदं अ०९
दिविसदंदेवसदंनाकसदमुपयामगृहीतोसींद्रायत्वाजु
ष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम्॥२॥अपाꣳरस
सम्॥अपाꣳरसमुद्वयसꣳसूर्येसंतꣳसमाहितम्॥अ
पाꣳरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीं
द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम्॥३॥ ८१

ग्रहाऽऊर्ज्जाऽहुतयः।ग्रहाऽऊर्ज्जाहुतयोव्यंतोविप्रायम
तिम।तेषांविशिप्रियाणांवोहमिषमूर्ज्जꣳसमग्रभमुप॥
यामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वा
जुष्टतमम।संपृचौस्थः।संमाभद्रेणपृंक्तंविपृचौस्थोविमा
पाप्मनापृंक्तम॥४॥इन्द्रस्यवज्रः।इंद्रस्यवज्रोसिवाज॥
सास्त्वयायंवाजꣳसेत।वाजस्यनुप्रसवेमातरंमहीम।

सं०हि० दितिंनामवचसाकरामहे।यस्यामिदंविश्वंभुवनमाविवेश। अ०९
८२ तस्यान्नोदेवःसविताधर्मसाविषत॥५॥अप्स्वंतः॥अप्स्वंत
रमृतमप्सुभेषजमपामुतप्रशस्तिष्वश्वाभवतवाजिनः।दे
वीरापोयोवऽऊर्मिःप्रतूर्तिःककुन्मान्वाजसास्तेनायंवा
जंसेत॥६॥वातोवा॥मनोवागंधर्वाःसप्तविंशतिः।ते
ऽअग्रेश्वमयुंजंस्तेअस्मिंजवमादधुः॥७॥वातरंहाभ ८२

व॥ वाजिन्युज्यमान ऽइंद्रस्येव दक्षिणः श्रियैधि॥ युंजंतु त्वाम
रुतो विश्ववेदस ऽआ ते त्वष्टा पत्सु जवं दधातु॥ ९॥ जवो यः
॥ जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तो ऽअचरच्च
वाते॥ तेन नो वाजिन्बलवान्बलेन वाजजिच्च भव समने च
पारयिष्णुः॥ वाजिनो वाजजितो वाजꣳ सरिष्यंतो बृहस्प
तेर्भागमवजिघ्रत॥ १०॥ देवस्याहम्॥ देवस्याहꣳ सवितुः॥

संहिपं
९३

सवेसत्यसवसोबृहस्पतेरुत्तमंनाकꣳरुहेयम॥देवस्याह श्रू॰९९
ꣳसवितुःसवेसत्यसवसऽइंद्रस्योत्तमंनाकꣳरुहेयम
देवस्याहꣳसवितुःसवेसत्यप्रसवसोबृहस्पतेरुत्तमं
नाकमरुहम॥देवस्याहꣳसवितुःसवेसत्यप्रसवसऽइं
द्रस्योत्तमंनाकमरुहम॥१०॥बृहस्पतेवाजंजयबृहस्प
तयेवाचंवदतबृहस्पतिंवाजंजापयत॥इंद्रवाजंजयें ९३

द्रायवाचंवदतेंद्रंवाजंजापयत॥११॥एषावः॰एषावःसास
त्यासंवागभूद्ययाबृहस्पतिंवाजमजीजपताजीजपत।
बृहस्पतिंवाजंवनस्पतयोविमुच्यध्वम्॥एषावःसासत्या
संवागभूद्ययेंद्रंवाजमजीजपताजीजपतेंद्रंवाजंवनस्प
तयोविमुच्यध्वम्॥१२॥देवस्याहम्॥देवस्याहꣳसवितुः
सवेसत्यप्रसवसोबृहस्पतेर्वाजजितोवाजंजेषम्॥वाजि।

संहि॰ नोवाजजितोध्वनस्कभ्नुवंतोयोजनामिमानाःकाष्ठांगछत ऋ॰ श्री

८४ ॥१३॥ एषस्यवाजीक्षिपणिंतुरण्यतिग्रीवायांबद्धोऽअपिक

क्षऽआसनि॥ क्रतुंदधिक्राऽअनुसंतवीत्वत्पथामं

कांसि॥ अन्वापनीफणत्स्वाहा॥ १४॥ उतस्म॥ उतस्मास्यद्र

वतस्तुरण्यतःपर्णंनवेरनुवातिप्रगर्धिनः॥ श्येनस्येव

ध्रजतोऽअंकसंपरिदधिक्राव्णःसहोर्जातरित्रतःस्वा ८४

हा॥६॥शंनो॥भ॥न्नान्नोच्चवंतुवाजिनोहवेषुदेवतातामितद्रु
वः॥स्वर्काः॥जंभयंतोहिंवृकंरक्षांसिसनेम्यस्मद्यु
यवन्नमीवाः॥७॥तेनो॥भ॥तेनोअर्वंतोहवनश्रुतोहवंवि
श्वेशृण्वंतुवाजिनोमितद्रवः॥सहस्रसामेधसातास।
निष्यवोमहोयेधनंसमिथेषुजभ्रिरे॥८॥वाजेवाजेव
त॥वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः॥अस्यम

संहि १८ ध्वंपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ १८ ॥ आमा । श्र॰ १९
८५ ॥ वाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आ
मागंतांपितरामातराचामासोमोऽमृतत्वेनगंम्यात ॥ ।
वाजिनोवाजजितोवाजंसस्रवांसोबृहस्पतेर्भागमव
जिघ्रतनिमृजानाः ॥ १९ ॥ आपयेस्वाहा ॥ स्वापयेस्वाहा
ऽपिजायस्वाहाक्रतवेस्वाहावसवेस्वाहाहर्पतयेस्वाहा ८५

न्हेमुग्धायस्वाहामुग्धायवैनंशिनायस्वाहाविनंशि
नऽआंत्यायनायस्वाहांत्यायभौवनायस्वाहाभुवनस्य
पतयेस्वाहाधिपतयेस्वाहा ॥२०॥ आयुर्यज्ञेन कल्पतां।
प्राणोयज्ञेनकल्पतांचक्षुर्यज्ञेनकल्पतां श्रोत्रंयज्ञेन
कल्पतांपृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्पतांम॥प्रजा
पतेःप्रजाऽअभूमस्वर्द्देवाऽअगन्मामृताऽअभूम ॥२१॥

सं॰हि॰ अस्मेव॰॥ अस्मेवो ऽअस्त्विंद्रियमस्मेनृम्णमुतक्रतुरस्मे अ॰९

९६ वर्चाꣳसिसंतुवः॥ नमोमात्रेपृथिव्यैनमोमात्रेपृथिव्या ऽइ मो

यंतेराड्यंतासियमनोध्रुवोसिधरुणः॰ कृष्यैत्वाक्षेमाय

त्वारय्यैत्वापोषायत्वा॥२२॥ वाजस्येमम्॥ वाजस्येमंप्रसवः

सुषुवेग्रेसोमꣳ॰ राजानमोषधीष्वप्सु॥ ता ऽअस्मभ्यंमधु

मतीर्भवंतुवयꣳ॰ राष्ट्रेजागृयामपुरोहिताः स्वाहा॥२३॥ वा ९६

जस्येमां॥प्रसवःशिश्रियेदिवमिमाचविश्वाभुवनानिसम्रा
ट्॥अदित्संतंदापयतिप्रजानंत्सनोरयिꣳसर्ववीरंनिय
च्छतुस्वाहा॥२४॥वाजस्यनु॥प्रसवऽआबभूवेमाचविश्वा
भुवनानिसर्वतः॥सनेमिराजापरियातिविद्वान्प्रजांपु
ष्टिंवर्द्धयमानोऽअस्मेस्वाहा॥२५॥सोमꣳराजानम॥सो
मꣳराजानमवसेग्निमन्वारभामहे॥आदित्यान्विष्णुꣳ

संहि· सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा ॥ २६ ॥ अर्यमणं बृहस्पतिं ॥ अ· ए

८७ ꣳ स्वाहा ॥ २६ ॥ अर्यमणं बृहस्पतिम ॥ अर्यमणं बृहस्पतिं ॥

मिंद्रं दानाय चोदय ॥ वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाꣳ

जिनꣳ स्वाहा ॥ २७ ॥ अग्ने अच्छ ॥ अग्ने ऽ अच्छा वदेह नः

प्रति नः सुमना भव ॥ प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदा ऽ

असि स्वाहा ॥ २८ ॥ प्र नः ॥ प्र नो यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः ८७

प्रवाग्देवीददातुनः स्वाहा ॥२९॥ देवस्यत्वा । सवितुः प्रसवेश्वि
नोर्बाहुभ्यांपूष्णोहस्ताभ्याम् । सरस्वत्यैवाचोयंतुर्यंत्रिये
दधामिबृहस्पतेष्ट्वासांम्राज्येनाभिषिंचाम्यसौ ॥३०॥ अग्नि
रेकाक्षरेण । प्राणमुदजयत्तमुज्जेषमश्विनौद्व्यक्षरेणद्वि
पदोमनुष्यानुदजयतांतानुज्जेषंविष्णुस्त्र्यक्षरेणत्रींल्लो
कानुदजयत्तानुज्जेषंसोमश्चतुरक्षरेणचतुष्पदः पशूनु

संहि० सप्तग्राम्यान्पशूनुदजयꣳस्तानुज्जेषंबृहस्पतिरष्टाक्षरेण ग्रं·३
दजयत्तानुज्जेषंपूषापंचाक्षरेण॥३१॥पूषापंचाक्षरेण॥पंचदि ग्र·९
८८ शऽउदजयत्तानुज्जेषꣳसविताषडक्षरेणषडृतूनुदजय॥
त्तानुज्जेषंमरुतꣳसप्ताक्षरेणगायत्रीमुदजयत्तामुज्जेषंमि
त्रोनवाक्षरेण॥३२॥मित्रोनवाक्षरेणत्रिवृतꣳस्तोममुदज
यत्तमुज्जेषंवरुणोदशाक्षरेणविराजमुदजयत्तामुज्जेषं
मिंद्रऽएकादशाक्षरेणत्रिष्टुभमुदजयत्तामुज्जेषंविश्वेदेवा ८८

द्वादशाक्षरेणजगतीमुदजयꣳस्तामुज्जेषंवसवस्त्रयोद
शाक्षरेण।३३।वसवस्त्रयोदशाक्षरेणत्रयोदशꣳस्तो
ममुदजयꣳस्तमुज्जेषꣳरुद्राश्चतुर्दशाक्षरेणचतुर्दश
ꣳस्तोममुदजयꣳस्तमुज्जेषमादित्याःपंचदशाक्षरे
णपंचदशꣳस्तोममुदजयꣳस्तमुज्जेषमदितिःषोडशा
क्षरेणषोडशꣳस्तोममुदजयत्तमुज्जेषंप्रजापतिःसप्त

संहिर्पि
प९९

देवाक्षरेणसप्तदश्नाथ्यंस्तोममुदजयत्तमुज्जेषम॥३४॥एषद
ते॥निःकृतेनागस्तंजुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यःपु
रःसद्भ्यःस्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यःस्वा
हाविश्वदेवनेत्रेभ्योदेवेभ्यःपश्चात्सद्भ्यःस्वाहामित्राव
रुणनेत्रेभ्योवामरुन्नेत्रेभ्योवादेवेभ्यउत्तरासद्भ्यःस्वा
हासोमनेत्रेभ्योदेवेभ्यउपरिसद्भ्योदुवस्वद्भ्यःस्वाहा

श्री·९९
९९

उप ॥ ये देवा ॥ ये देवाऽअग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये
देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा विश्वदेव
नेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वाम
रुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्राऽउपरि
सदोऽदुवस्वंतस्तेभ्यः स्वाहा ॥ ३६ ॥ अग्ने सहस्व पृतनाऽअ
भिमातीरपास्य ॥ ऽदुष्टरस्तरंनरातीर्वर्चो धा यज्ञवाहसि ॥ ३७

संहि॰ देवस्यत्वा।सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् अ॰९
९६ उपांशोर्वीर्येण॰जुहोमिहतꣳरक्षःस्वाहारक्षसांत्वा।
वधायावधिष्मरक्षोवधिष्मामुमसौहतः॥३८॥सवितात्वा
सवानाꣳसुवतामग्निर्गृहपतीनाꣳसोमोवनस्पतीना
म्॥बृहस्पतिर्वाचइंद्रोजैष्ठ्यायरुद्रःपशुभ्योमित्रःस
त्योवरुणोधर्मपतीनाम्॥३९॥इमंदेवाः॥इमंदेवाऽअस ९६

पत्नꣳ॰ सुवध्वंमहतेक्षत्त्रायमहतेज्यैष्ठ्यायमहतेजानरा
ज्यायेंद्रस्येंद्रियाय॥ इममुमुष्यपुत्त्रममुष्यैपुत्त्रमस्यैविश
ऽएषवोमीराजासोमोस्माकंब्राह्मणानाꣳराजा॥ ४०॥ इ
तिवाजसनेयीसंहितायांनवमोध्यायः॥ ॥ अपोदेवाः॥
अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चितानाः
॥याभिर्मित्रावरुणावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरा

संहि॰
९२

ती॥२॥ वृष्ण ऽऊर्मि॰ वृष्ण ऽऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वा अ॰ ९॰
हा वृष्ण ऽऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि वृषसेनोऽसि
राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै
देह्यर्थेतस्थ॥३॥ अर्थेतस्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थे
तस्थ राष्ट्रदा राष्ट्रममुष्मै दत्तौजस्वती स्थ राष्ट्रदा राष्ट्रं मे
दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः परिवा ९२

हिणीस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहापःपरिवाहिणीस्थराष्ट्र
दाराष्ट्रममुष्मैदत्तापांपतिरसिराष्ट्रदाराष्ट्रंमेदेहिस्वाहा
पांपतिरसिराष्ट्रदाराष्ट्रममुष्मैदेत्तपांगर्भोसिराष्ट्रदारा
ष्ट्रंमेदेहिस्वाहापांगर्भोसिराष्ट्रदाराष्ट्रममुष्मैदेहिसूर्य॥
त्वचसस्थ॥ॐ॥सूर्यत्वचसस्थ॥राष्ट्रदाराष्ट्रंमेदत्तस्वाहासू
र्यत्वचसस्थराष्ट्रदाराष्ट्रममुष्मैदत्तसूर्यवर्चसस्थराष्ट्र।

सं॰हि॰ दा राष्ट्रं मे दत्त स्वाहा सूर्य्यवर्च्चस स्थ राष्ट्रदा राष्ट्रम मुष्मै दत्त मां श्रु॰ १९
१८२ दा स्थ राष्ट्रदा राष्ट्रमै व दत्त स्वाहा मांदा स्थ राष्ट्रदा राष्ट्रम ।
मुष्मै दत्त व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित
स्थ राष्ट्रदा राष्ट्रम मुष्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त ।
स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रम मुष्मै दत्त शविष्ठा स्थ राष्ट्र ॥
दा राष्ट्रं मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रम मुष्मै दत्त श १८२

क्करीस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाशक्करीस्थराष्ट्रदाराष्ट्रममु
ष्मैदत्तजनभृतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाजनभृतस्थराष्ट्र
दाराष्ट्रममुष्मैदत्तविश्वभृतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाविश्व
भृतस्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्वराजस्थराष्ट्रदारा
ष्ट्रममुष्मैदत्तामधुमतीर्मधुमतीभिःपृच्यन्तांमहिक्षत्रंक्षत्र
त्रियायवन्वानाऽअनाधृष्टाःसीदतसहौजसोमहिक्ष

सं०हि०पं०
९३

त्रं क्षत्रियायदधती ॥ ध ॥ त्रातम ॥ ६९९ ॥ सोमस्यत्विषिः ॥ सोमस्य

त्विषिरसितवेवमेत्विषिर्भूयात ॥ अग्नयेस्वाहा ॥ सोमायस्वा

हा ॥ सवित्रेस्वाहा ॥ सरस्वत्यैस्वाहा ॥ पूष्णेस्वाहा ॥ बृहस्पतयेस्वाहा ॥ इं

द्रायस्वाहा ॥ घोषायस्वाहा ॥ श्लोकायस्वाहा ॥ अंशायस्वाहा ॥ भगा

यस्वाहा ॥ अर्यम्णेस्वाहा ॥ प ॥ पवित्रेस्थः ॥ पवित्रेस्थोवैष्णव्यौ ॥ स

वितुर्वःप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मि

श्रु०१९
९३

नि ॥ ॥ अग्निसृष्टमसि वाचो बंधुस्तपोजाः सोमस्य दात्रमसि स्वा

हा राजस्वः ॥ ६ ॥ सधमादो द्युम्निनीः ॥ सधमादो द्युम्निनीरा

प ऽ एता ऽ अनाधृष्टा ऽ अपस्यो वसानाः पस्त्यासु चक्रे वरु ॥

णः सधस्थमपाᳪं शिशुर्मातृतमास्वंतः ॥ ७ ॥ क्षत्रस्योल्ब

म ॥ क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि

क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रघ्नमसि मित्रस्यासि वरुण

स्यासित्वयायंवृत्रंवधेत॥दृवासिरुजासिक्षुमासि॥पातैनं
प्रांचंपातैनंप्रत्यंचंपातैनंतिर्यंचंदिग्भ्यःपात॥८॥आविर्मर्या
॥आवित्तोऽअग्निर्गृहपतिरावित्तऽइंद्रोवृद्धश्रवाऽआवि
त्तौमित्रावरुणौधृतव्रतावावित्तःपूषाविश्ववेदाऽआवित्ते
द्यावापृथिवीविश्वशंभुवावावित्तादितिरुरुशर्म्मा॥९॥
अवेष्टादंदशूकाः॥प्राचीमारोहगायत्रीत्वावतुरथंतरꣳ·।

सामत्रिवृत्स्तोमोवसंतऋतुर्ब्रह्मद्रविणंदक्षिणामारोह ॥ १० ॥
दक्षिणामारोहत्रिष्टुप्त्वावतुबृहत्सामपंचदशस्तोमोग्रीष्म
ऋतुःक्षत्रंद्रविणंप्रतीचीमारोह ॥ ११ ॥ प्रतीचीमारोहजग
तीत्वावतुवैरूपंसामसप्तदशस्तोमोवर्षाऋतुर्विड्द्रविण
मुदीचीमारोह ॥ १२ ॥ उदीचीमारोहानुष्टुप्त्वावतुवैराजंसा
मैकविंशस्तोमःशरदृतुःफलंद्रविणमूर्ध्वामारोह ॥ १३ ॥ ऊ

संहि॰ ९
९५

र्ध्वामारोह॥ पंक्तिःस्त्वावतुशाक्वररैवतेसामनीत्रिणवत्रयस्त्रिं॥ अ॰ ९

शौःस्तोमौहेमंतशिशिरावृतूवर्चोद्रविणंप्रत्यस्तंनमुचेःशि

रः॥१४॥सोमस्यत्विषिः॥सोमस्यत्विषिरसितवेवमेत्विषिर्भू

यात्॥मृत्योःपाह्योजोसिसहोस्यमृतमसि॥१५॥हिरण्यरूपा

उषसः॥हिरण्यरूपाउषसोविरोकउभाविन्द्राउदिथःसूर्य

श्च॥आरोहतंवरुणमित्रगर्त्तंततश्चक्षाथामदितिंदितिंचमि ९५

त्रोसिवरुणोसि ॥१६॥ सोमस्यत्वाद्युम्नेनाभिषिंचाम्यग्नेर्भ्रा
जसासूर्यस्यवर्चसेंद्रस्येंद्रियेण क्षत्राणांक्षत्रपतिरेध्यति
दिद्यून्पाहि ॥१७॥ इमंदेवा ॥ इमंदेवाऽअसपत्नꣳसुवध्वं
महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेंद्रस्येंद्रि
याय ॥ इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीरा
जासोमोस्माकंब्राह्मणानाꣳराजा ॥१८॥ प्रपर्वतस्यवृष

संहि॰
९६

नस्पृष्ठांनावश्चरंतिस्वसिचऽइयानाः॥ ताऽआववृत्रंनधु ऽध.रा
रागुदक्ताऽअहिंबुध्न्यमनुरीयमाणाः॥ विष्णोर्विक्रमणम
सिविष्णोर्विक्रांतमसिविष्णोःक्रांतमसि॥१९॥ प्रजापतेन
त्वदेतान्यन्योविश्वारूपाणिपरिताबभूव॥ यत्कामास्तेजु
हुमस्तन्नोऽअस्त्वयममुष्यपितासावस्यपितावयंस्या
मपतयोरयीणांस्वाहा॥ रुद्रयत्तेक्रिविपरंनामतस्मिन्हु ९६

तमस्यमेष्टमस्तिस्वाहा ॥२०॥ इंद्रस्यवज्र॰ ॥ इंद्रस्यवज्रोसि
मित्रावरुणयोस्त्वाप्रशास्त्रोःप्रशिषायुनज्मि ॥ अव्यथा
यैत्वास्वधायैत्वारिष्टो ऽअर्जुनोमरुतांप्रसवेनजयापाम
मनसासमिंद्रियेण ॥२१॥ मोते ॥ मात ऽइंद्रतेवयंतुराषाडयु
क्तासो ऽअब्रह्मताविदसाम ॥ तिष्ठारथमधियंवज्रहस्ता ऽ
रश्मींदेवयमसेस्वश्वान् ॥२२॥ अग्नयेगृहपतयेस्वाहासो

सं.हि.५ मायुव्वनस्पतयेस्वाहामरुतामोजसेस्वाहेंद्रस्येंद्रियायस्वाहा ॥ पृ श्री·५९
९७ थिविमातर्मामाहिꣳसीर्मोऽअहंत्वाम ॥ २७ ॥ हꣳसः शुचिषत ॥
हꣳसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदेथिर्दुरोणसत ॥ ति
नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतं
बृहत ॥ २८ ॥ इयदसि ॥ इयद्दस्यायुरस्यायुर्मयिधेहियुंङ·सि
व्वर्चोसिव्वर्चोमयिधेह्यूर्गस्यूर्जंमयिधेहि ॥ इंद्रस्यवांवीर्यकृ ९७

तौबाहूऽअग्न्यूपावहरामि॥२५॥स्योनासिसुषदासिक्षत्रस्य मा
योनिरसि॥स्योनामासीदसुषदाँसीदक्षत्रस्ययोनिमासी
द॥२६॥निषसाद॥धृतव्रतोवरुणःपस्त्यास्वा॥साम्राज्याय
सुक्रतुः॥२७॥अभिभूरसि॥अभिभूरस्येतास्तेपंचदिशः
कल्पंतांब्रह्मँस्त्वंब्रह्मासिसवितासिसत्यप्रसवोवरुणो
सिसत्यौजाःइंद्रोसिविशौजारुद्रोसिसुशेवः॥बहुका

संहि° १० रक्षोयस्कारन्नायस्कारैंद्रस्यवज्रोसितेनमेरध्य॥ २८॥ अग्निः अ.१०
९८ पृथुः॥ अग्निः पृथुर्धर्मणस्पतिर्जुषाणो अग्निः पृथुर्ध
र्मणस्पतिराज्यस्यवेतुस्वाहास्वाहाकृताः सूर्यस्यरश्मिभिर्
र्यतध्वꣳसजातानांमध्यमेष्ठ्याय॥ २९॥ सवित्राप्रसवि॥
त्रा॥ सरस्वत्यावाचात्वष्ट्रारूपैः पूष्णापशुभिरिंद्रेणास्मे
बृहस्पतिनाब्रह्मणावरुणेनौजसाग्निनातेजसासोमे ९८

नराज्ञाविस्नुनादज्ञाम्पादेवतयाप्रस्नुतःप्रसर्पामि॥ २॥ अ
श्विभ्यांपच्यस्व॥ सरस्वत्यैपच्यस्वेंद्रायसुत्राम्णेपच्यस्व॥ ॥
वायुःपूतःपवित्रेणप्रत्यंक्सोमोऽअतिस्नुतः॥ इंद्रस्ययु
ज्यःसखा॥ ३॥ कुविदंग॥ यवमंतोयवंचिद्यथादांत्यनु
पूर्वंवियूय॥ इहेहैषांकृणुहिभोजनानियेबर्हिषोनम
ऽउक्तिंयजंति॥ उपयामगृहीतोस्यश्विभ्यांत्वासरस्व

संहि॰ सोत्वेंद्रंज्ञापयत्वासुत्रामो॥३२॥ युवꣳ सुरामम॥ युवꣳ सुरा अ॰१०
९९ मम्श्विनानमुचावासुरेसचा॥ विपिपानाशुभस्पतीइं
द्रंकर्मस्वावतम॥३३॥ पुत्रमिवपितरौ॥ पुत्रमिवपितरावा त
श्विनोभेंद्रावथुः काव्यैर्दꣳसनाभिः॥ यत्सुरामंव्यपिबः॥ श
चीभिः सरस्वतीत्वामघवन्नभिष्णक॥३४॥ इतिवाजस
नेयीसंहितायांदशमोध्यायः॥ युंजानः प्रथममम॥ युंजानः ९९

प्रथमंमनस्तत्वायसविताधियः॥ अग्नेर्ज्योतिर्निचाय्यपृथि
व्याऽअध्याभरत॥१॥युक्तेनमनसा॥ वयंदेवस्यसवितुःस
वेंस्वर्ग्यायशक्त्या॥२॥युक्त्वायसविता॥ देवान्त्स्वर्यतोधि
यादिवम्॥ बृहज्ज्योतिःकरिष्यतःसविताप्रसुवातितान्॥३॥
युंजतेमनः॥ युंजतेमनउततयुंजतेधियोविप्राविप्रस्यबृ
हतोविपश्चितः॥ विहोत्रादधेवयुनाविदेकऽइन्महीदेव।

संहि०
२०७

स्यसवितुःपरिष्टुतिः॥४॥युजेवाम॥युजेवांब्रह्मपूर्व्यंनमोभिर्वि अ० ११
श्लोकऽएतुपथ्येवसूरेः॥शृण्वंतुविश्वेऽअमृतस्यपुत्राः॥
आयेधामानिदिव्यानितस्थुः॥५॥यस्यप्रयाणम॥यस्यप्र
याणमन्वन्यऽइद्ययुर्देवादेवस्यमहिमानमोजसा॥यःपा
र्थिवानिविममेसऽएतशोरजाꣳसिदेवःसवितामहित्व
ना॥६॥देवसवितःप्रसुवयज्ञंप्रसुवयज्ञपतिंभगाय॥दि २०७

व्योगंधर्व्वःकेतपूःकेतंन्नःपुनातुवाचस्पतिर्व्वाचंन्नःस्वदतु।
७ इमन्नः ॥ इमंन्नोदेवसवितुर्यज्ञंप्रणयदेवाव्यꣳसखिवि
दꣳसत्राजितंधनजितꣳस्वर्जितम् ॥ ऋचास्तोमꣳसमर्धय
गायत्रेणरथंतरंबृहद्गायत्रवर्त्तनिस्वाहा ॥ ८ ॥ देवस्यत्वा ॥
सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ आददेगा
यत्रेणछंदसांगिरस्वत्पृथिव्याःसधस्थादग्निंपुरीष्यम् ।

संहि· गिरस्वदाभ्वरस्त्रैष्टुभेन छंदसांगिरस्वत ॥ ९ ॥ अग्निरसि ॥ नार्यसि अ·११
१४१ त्वयावयमग्निर्ठ· शकेमखनितुर्ठ· सधस्थआ ॥ जागतेन छंद
सांगिरस्वत ॥ १० ॥ हस्तआधाय ॥ सविता बिभ्रदभ्रिर्ठ· हिर
ण्मयीम् ॥ अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरदानुष्टु
भेनछंदसांगिरस्वत ॥ ११ ॥ प्रतूर्त्तंबाजिन् ॥ प्रतूर्त्तंवाजिंन्ना·
वद्वरिष्ठामनुसंवतम् ॥ दिवितेजन्मपरममंतरिक्षे तवना १४१

निःपृथिव्यामधियोनिरित्त॥१२॥युंजाथांरासभं॥युवमस्मिं
न्यामेवृषंण्वसू॥अग्निंभरंतमस्मयुम॥१३॥योगेयोगेतव॥
स्तरं॥वाजेवाजेहवामहे॥सखायऽइंद्रमूतये॥१४॥प्रतूर्वं॥
नेहि॥प्रतूर्वंनेत्यवक्रामंनशस्तीरुद्रस्यगाणपत्यंमयोभू
रेहि॥उर्वंतरिक्षंवीहिस्वस्तिगव्यूतिरभयानिकृण्वंन्पूष्णा॥
सयुजासह॥१५॥पृथिव्याःसधस्थात॥पृथिव्याःसधस्था

संहि॰ दग्निंपुरीष्यमंगिरस्वदाभराग्निंपुरीष्यमंगिरस्वदछेमोग्निं। अ॰११
१०२ पुरीष्यमंगिरस्वद्भरिष्यामः॥१६॥ अन्वग्निः॥ अन्वग्निरुषस॥
सामग्रमख्यदन्वहानि प्रथमोजातवेदाः॥ अनुसूर्यस्यपुरु
त्राचरश्मीननुद्यावापृथिवीऽआततंथ॥१७॥ आगत्यवा॥
जी॥ आगत्यवाज्यध्वानंसर्वामृधोविधूनुते॥ अग्निंस
धस्थेमहतिचक्षुषानिचिकीषते॥१८॥ आक्रम्यवाजिन॥ आ १०२

क्रम्यवाजिन्पृथिवीमग्निमिच्छरुचात्वम्॥भूम्यावृत्त्वायनोब्रू
हियतःखनेमतंवयम्॥२०॥द्यौस्ते॥पृष्ठंपृथिवीसधस्थमा
त्मांतरिक्षꣳसमुद्रोयोनिः॥विख्यायचक्षुषात्वमभितिष्ठपृ
तन्यतः॥२१॥उत्क्राम॥महतेसौभगायास्माद्दास्थानाद्द्रविणो
दावाजिन॥वयꣳस्यामसुमतौपृथिव्याऽअग्निंखनंतऽउप
स्थेऽअस्याः॥२२॥उदक्रमीत॥उदक्रमीद्द्रविणोदावाज्यर्वा

संहिते र्वाकः सुलोकंऽसुकृतं पृथिव्याम्॥ ततः खनेमसुप्रतीकमग्नि। अ॰ ११

२०३ ं स्वो रुहाणा ऽअधि नाकमुत्तमम्॥२२॥ ऽआ त्वा॥ जिघर्म्मि म

नसा घृतेन प्रतिक्षियंतम्भुवनानि विश्वा॥ पृथुं तिरश्चा वयसा

बृहंतं व्यचिष्ठमंन्नै रभसंदृशानम्॥२३॥ आ विश्वतः॥ प्रत्यं

चं जिघर्म्यरक्षसा मनसा तज्जुषेत॥ मर्यश्री स्पृहयद्वर्णो ऽअ

ग्निर्नाभिमृशे तन्वा जर्भुराणः॥२४॥ परि वाजपतिः॥ कविरग्नि २०३

र्ह्यान्यक्रमीत्। दधद्रत्नानि दाशुषे॥ २५॥ परि त्वाग्ने पुरं वयं वि
प्रꣳ सहस्य धीमहि। धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम्॥ २
६॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्प
रि। त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥ २७
देवस्य त्वा। सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ पृ
थिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामि। ज्योतिष्मन्तं त्वा

संहि°
२०४

ग्नेस्त्रप्रतीकमजस्रेणभानुनादीद्यतम्॥शिवंप्रजाभ्योऽहिंसंतंपृ अ.११
थिव्याःसधस्थाद्दग्निंपुरीष्यमंगिरस्वत्खनामः॥२८॥अपांपृष्ठ
म॥अपांपृष्ठमसियोनिरग्नेःसमुद्रमभितःपिन्वमानम्॥व
र्द्धमानोमहाँ२॥आचपुष्करेदिवोमात्रयावरिम्णाप्रथस्व॥२९॥
शर्म्मचस्थोवर्म्मचस्थोछिद्रेबहुलेउभे॥व्यचस्वतीसंवसा
थांभृतमग्निंपुरीष्यम्॥३०॥संवसाथाम्॥संवसाथाँस्वर्विदा। २०४

समीचीनरसात्मना॥ अग्निमंतर्भरिष्यंतीज्योतिष्मंतमजस्र
मित्॥ ३१॥ पुरीष्योसि॥ विश्वभरा॥ अथर्वात्वा प्रथमोनिरमं
थदग्ने॥ त्वामग्नेपुष्करादध्यथर्वानिरमंथत॥ मूर्ध्नोविश्वस्य
वाघतः॥ ३२॥ तमुत्वा॥ दध्यङ्ङृषिः पुत्रईधे अथर्वणः॥ वृ
त्रहणंपुरंदरम्॥ ३३॥ तमुत्वा॥ पाथ्योवृषासमीधेदस्युहंतम
म्॥ धनंजयंरणेरणे॥ ३४॥ सीदहोतः॥ स्वउलोकेचिकि।

संहि० त्वांत्सादयायज्ञꣳ॰स्कृतस्ययोनौ॥देवावीर्देवान्हविषायजा अ०११
२०५ स्यग्नेबृहद्यजमानेवयोधाः॥३५॥निहोता॥होतृषदनेविदा
नस्त्वेषोदीदिवाꣳ॥ऽअसदत्सुदक्षः॥अदब्धव्रतप्रमतिर्व
सिष्ठः॥सहस्रंभरः॥शुचिजिह्वोऽअग्निः॥३६॥सꣳ॰सीदस्व
महाꣳ॥ऽअसिशोचस्वदेववीतमः॥विधूममग्नेऽअरुषं
मियेध्यसृजप्रशस्तदर्शतम॥३७॥अपोदेवीः॥अपोदेवी २०५

रूपंसृजंमधुमतीरयक्ष्मायप्रजाभ्यः॥तासांमास्थानादुज्जि

हतामोषधयःसुपिप्पलाः॥ ॐ॥संते॥वायुर्म्मातरिश्वादधातु

त्तानायाहृदयंयद्विकस्तम्॥योदेवानांचरसिप्राणथेनकस्मै

देववषडस्तुतुभ्यम्॥ ॐ॥सुजातोज्योतिषा॥सहशर्म्मवरूथ

मासदत्स्वः॥वासोऽग्नेविश्वरूपंसंव्ययस्वविभावसो॥

ॐ॥उदुतिष्ठ॥स्वध्वरावानोदेव्याधिया॥दृशेचभासाबृहता

ऊर्द्ध्वऽऊषुणो

संहि॰ सुश्रुक्वनिराग्नेयाहिसुत्रास्तित्नि॥४१॥ऊर्द्ध्वऽऊषुणऽऊतये। अ॰११

१०६ तिष्ठादेवोनसविता॥ऊर्द्ध्वोवाजस्यसनितायदञ्जिभिर्व्वाघद्भि

र्विह्वयामहे॥४२॥सजातः॥सजातोगर्भोऽअसिरोदस्योरग्ने

चारुर्विभृतऽओषधीषु॥चित्रःशिशुःपरितमांस्यक्तून्प्रमा

तृभ्योऽअधिकनिक्रदद्गाः॥४३॥स्थिरोभव॥वीड्वङ्गऽआशु

र्भववाज्यर्वन्॥पृथुर्भवसुषदस्त्वमग्नेःपुरीषवाहणः॥४४॥ १०६

शिवोभव॥प्रजाभ्योमानुषीभ्यस्त्वमंगिरः॥माद्यावापृथि
वीऽअभिशोचीर्मांतरिक्षंमावनस्पतीन॥४५॥प्रैतु॥वाजीक
निक्रदन्नानदद्रासभःपत्वा॥भरन्नग्निंपुरीष्यंमापाद्यायु
षःपुरा॥वृषाग्निंवृषणंभरन्नपांगर्भꣳसमुद्रियम॥अग्नऽ
आयाहिवीतये॥४६॥ऋतꣳसत्यम॥ऋतꣳसत्यमृतꣳस
त्यमग्निंपुरीष्यमंगिरस्वद्भरामः॥ओषधयःप्रतिमोदध्वमा

सं॰हि॰ ग्निमितर्ठं शिवमायंतमभ्यत्रयुष्माः ॥ व्यस्यन्विश्वाऽअनिराऽ अ॰ ११
२०५ अमीवानिषीदंन्नोऽअपदुर्म्मतिंजहि ॥ ४७ ॥ ओषधयः प्रति ॥
गृभ्णीतपुष्पवतीः सुपिप्पलाः ॥ अयंवोगर्भऽऋत्वियः प्रः ॥
त्नर्ठं सधस्थमासदत् ॥ ४८ ॥ विपाजसा पृथुनाशोशुचा ॥
नोबाधस्वद्विषोरक्षसोऽअमीवाः ॥ सुशर्म्मणोबृहतः श ॥
ह र्म्मणिस्यामग्नेरहर्ठं सुहवस्यप्रणीतौ ॥ ४९ ॥ आपोहिष्ठाम २०७

योऽनुवस्तानऽऊर्ज्जेदधातन॥ महेरणायचक्षसे॥ प५॥ योवः॥

शिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥ प६॥ त

स्माऽअरंगमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथा।

चनः॥ प७॥ मित्रः संसृज्य॥ पृथिवींभूमिंचज्योतिषासह॥

सुजातंजातवेदसमयक्ष्मायत्वासंसृजामिप्रजाभ्यः॥ प८॥

रुद्राः संसृज्य॥ पृथिवींबृहज्ज्योतिः समीधिरे॥ तेषांभानु।

संहि॰ रजस्र इच्छुक्रो देवेषु रोचते ॥५४॥ सꣳसृष्टां वसुभिः ॥ सꣳसृष्टां व अ॰ ११
१०८ सृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ॥ हस्ताभ्यां मृद्वीं कृत्वा सि
नीवाली कृणोतु ताम् ॥५५॥ सिनीवाली सुकपर्दा सुकुरीरा
स्वौपशा ॥ सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥५६॥ उखां
कृणोतु शक्त्या बाहुभ्यामदितिर्धिया ॥ माता
पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥ मखस्य शिरोसि ॥५७॥ १०८

वसवस्त्वा॥ कृण्वंतुगायत्रेणछंदसांगिरस्वद्ध्रुवासिपृथि
व्यसिधारयामयिप्रजाꣳरायस्पोषंगौपत्यꣳसुवीर्यꣳस
जातान्यजमानारुद्रास्त्वाकृण्वंतुत्रैष्टुभेनछंदसांगिरस्व।
द्ध्रुवास्यंतरिक्षमसिधारयामयिप्रजाꣳरास्पोषंगौपत्यꣳ
सुवीर्यꣳसजातान्यजमानायादित्यास्त्वाकृण्वंतुजागते
नछंदसांगिरस्वद्ध्रुवासिद्यौरसिधारयामयिप्रजाꣳराय

सं॰हि॰
२०९

स्पोषंगोपत्यᳪं॰सुवीर्यᳪं॰सजातान्यजमानायविश्वेत्वादेवावैश्वा अ॰११
नराः॰कृण्वंत्वानुष्टुभेनछंदसांगिरस्वद्ध्रुवासिदिशोसिधार
यामयिप्रजाᳪंरायस्पोषंगोपत्यᳪं॰सुवीर्यᳪं॰सजातान्यजमाना
य॥५८॥अदित्यैरास्नास्यदितिष्टेबिलंगृभ्णातु।कृत्वायसा
महीमुखाम्मृन्मयींयोनिमग्नये।पुत्रेभ्यः।प्रायच्छददितिः।श्र
पयानिति॥५९॥वसवस्त्वाधूपयंतुगायत्रेणछंदसांगिर- २०९

स्वद्रुद्रास्त्वाधूपयंतुत्रैष्टुभेनछंदसांगिरस्वदादित्यास्त्वाधू

पयंतुजागतेनछंदसांगिरस्वद्विश्वेत्वादेवावैश्वानराधूपयंत्वा न

नुष्टुभेनछंदसांगिरस्वदिंद्रस्त्वाधूपयतुवरुणस्त्वाधूपयतुवि

ष्णुस्त्वाधूपयतु॥६०॥अदितिष्ट्वा॥देवीविश्वदेव्यावतीपृथि

व्याःसधस्थेअंगिरस्वत्खनत्ववटदेवानांत्वापत्नीर्देवीर्विश्व

देव्यावतीःपृथिव्याःसधस्थेअंगिरस्वद्दधतूखेधिषणास्त्वा

संहि०
११६

श्रपयंतूखेग्नास्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वत् २
देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगिरस्वदभींधता॥ अ.११
मुखेवरूत्रीष्ट्वादेवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअंगि
रस्वत्पचंतूखेजनयस्त्वाछिंनपत्रादेवीर्विश्वदेव्यावतीः पृथि
व्याः सधस्थेऽअंगिरस्वत्पचंतूखे॥ ६१॥ मित्रस्यचर्षणीधृतः
॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि॥ द्युम्नंचित्रश्रवस्त
मम्॥ ६२॥ देवस्त्वा॥ सवितोद्वपतुसुपाणिः स्वंगुरिः सुबा॥ ११०

ज्रुस्तत्रशक्त्या॥ अप्रथमानापृथिव्यामाशादिशऽआपृण
॥५५॥ उत्थायबृहती॥ भवोदुतिष्ठध्रुवात्वम्॥ मित्रैतांतऽउखां
परिददाम्यभित्त्याऽएषामाभेदि॥ ५६॥ वसवस्त्वा॥ छृंदंतु।
गायत्रेणछंदसांगिरस्वद्रुद्रास्त्वाछृंदंतुत्रैष्टुभेनछंदसां॥ द
गिरस्वदादित्यास्त्वाछृंदंतुजागतेनछंदसांगिरस्वद्वि
श्वेत्वादेवावैश्वानराऽआछृंदंत्वानुष्टुभेनछंदसांगिर

संहि०
१११

स्वत ॥६५॥ आकूतिमग्निं ॥ प्रयुजᳪं स्वाहा मनो मेधामग्निं अ०११
प्रयुजᳪं स्वाहा चित्तं विज्ञातमग्निं प्रयुजᳪं स्वाहा वाचो
विधृतिमग्निं प्रयुजᳪं स्वाहा प्रजापतये मनवे स्वाहाग्न
ये वैश्वानराय स्वाहा ॥६६॥ विश्वो देवस्य ॥ नेतुर्मर्त्तो वुरीत
सख्यम् ॥ विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा
६७ ॥ मा सु ॥ भित्था मा सु रिषोम्ब धृष्णु वीरयस्व सु ॥ अग्नि १११

स्वेदंकरिष्यसि ॥ २१८ ॥ २१८ ॥ देस्त्व ॥ देवविदध्यिविस्वस्तयऽग्ना ।
सुरीमायास्वधयाकृतासि ॥ जुष्टंदेवेभ्यऽइदमस्तुहु । व्यम
रिष्टात्वमुद्दिहियज्ञेऽस्मिन ॥ २२ ॥ ३१ ॥ इन्नः सर्पिरासुतिः ॥ प्र
प्रत्नोहोतावरेण्यः ॥ सहसस्पुत्रोऽअद्भुतः ॥ ३ ॥ ३४ ॥ त्रातम ॥ पर्व
परस्पाऽअधि ॥ संवतोवरांशऽअन्वातर ॥ यत्राहमस्मितां
ऽअव ॥ ७४ ॥ पुरमस्यात्परावतः ॥ परस्पाः परावतोरे ।

संहि० हिदंस्थ॥इहागहि॥पुरीष्यःपुरुप्रियोग्नेत्वंतरामृधः॥७२॥य अ०११

११२ दग्ने॥कानिकानिचिदातेदारूणिदध्मसि॥सर्वंतदस्तुतेघृ

तंतज्जुषस्वयविष्ठ्य॥७३॥यदत्ति॥यदत्त्युपजिह्विकायद्वम्रो

अतिसर्पति॥सर्वंतदस्तुतेघृतंतज्जुषस्वयविष्ठ्य॥७४॥अ

हरहरप्रयावम्॥अहरहरप्रयावंभरंतोश्वायेवतिष्ठतेघा

समस्मै॥रायस्पोषेणसमिषामदंतोग्नेमातेप्रतिवेशारि ११२

षाम् ॥ ७५ ॥ नाभा पृथिव्याः ॥ समिधाने ऽअग्नौ रायस्पोषाय बृ
हते हवामहे ॥ इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु ।
सासहिम् ॥ ७६ ॥ याः सेनाः ॥ याः सेना ऽअभीत्वरीराव्याधि ।
नीरुगणा ऽउत ॥ ये स्तेना ये च तस्करास्तांस्ते ऽअग्नेपिदधा ।
म्यास्ये ॥ ७७ ॥ दंष्ट्राभ्यां मलिम्लूं जंभ्यैस्तस्करां ऽउत ॥ ह
नुभ्यां स्तेनान्भगवस्तांस्त्वं खाद सुखादितान् ॥ ७८ ॥ ये ज ।

सं॰हि॰ नेषु॥ मलिम्लवस्तेनासस्तस्करावने॥ येकक्षेष्वघायवस्ताँ॥ अ॰ ११
२२३ स्तेदधामिजंभयोः॥ ७९॥ योऽअस्मभ्यम॥ योऽअस्मभ्यमरा॥
तीयाद्यश्चनोद्वेषतेजनः॥ निंदाद्योऽअस्मांधिप्साच्चसर्वंतंम
स्मसाकुरु॥ ८०॥ सꣳशितंमे॥ ब्रह्मसꣳशितंवीर्यंबलम्॥ स
ꣳशितंक्षत्रंजिष्णुयस्याहमस्मिपुरोहितः॥ ८१॥ उदेषां॥
बाहूऽअतिरमुद्वर्चोऽअथोबलम्॥ क्षिणोमिब्रह्मणामित्रा॥ २२३

नो

नुंनयामिस्वाहा॥ अहम॥८२॥ अन्नपतेन्नस्य॥ नोदेह्यनमीव
स्यशुष्मिणः॥ प्रप्रदातारंतारिषऽऊर्ज्जंनोधेहिद्विपदेचतुष्प
दे॥८३॥ इतिवाजसनेयीसंहितायांएकादशोध्यायः॥ दृशो॥
नोरुक्मः॥ दृशानोरुक्मऽउर्व्याव्यद्यौद्दुर्म्मर्षमायुःश्रियेरुचा
नः॥ अग्निरमृतोऽअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः॥
१॥ नक्तोषासासमनसा॥ विरूपेधापयेतेशिशुमेकꣳसमी॥

संहि॰ १२६ ची। द्यावाक्षामारुक्मोऽअंतर्विभातिदेवाऽअग्निंधारयंद्रविणोदाः। अ॰१२

॥२॥ विश्वारूपाणि। प्रतिमुंचतेकविः प्रासावीद्भद्रंद्विपदेचष्पद तु

दे। विनाकमख्यत्सवितावरेण्योनुप्रयाणमुषसोविराजति।३

सुपर्णोसि। गरुत्मांस्त्रिवृत्तेशिरोगायत्रंचक्षुर्बृहद्रथंतरेप

क्षौ। स्तोमऽआत्माछंदांꣳस्यंगानियजूंꣳषिनाम। सामते।

तनूर्वामदेव्यंयज्ञायज्ञियंपुच्छंधिष्ण्याःशफाः। सुपर्णोसि। १२६

गरुत्माँदिवंगछस्वःपत॥४॥विष्णोःक्रमः॥विष्णोःक्रमो
सिसपत्नहागायत्रंछंदऽआरोहपृथिवीमनुविक्रमस्ववि
ष्णोःक्रमोस्यभिमातिहात्रैष्टुभंछंदऽआरोहांतरिक्षमनु
विक्रमस्वविष्णोःक्रमोस्यरातीयतोहंताजागतंछंदऽआ
रोहदिवमनुविक्रमस्वविष्णोःक्रमोसिशत्रूयतोहंतानुष्टु
भंछंदऽआरोहदिशोनुविक्रमस्व॥५॥अक्रंददग्निःस्त

संहि क्रंददग्निस्तनयंनिवद्यौःक्षामारेरिहद्वीरुधःसमंजन॥स अ.१२
२२५ द्योजज्ञानोवि हीमिद्धोऽअख्यदारोदसीभानुनाभात्यंतः॥
६॥अग्नेभ्यावर्त्तिन॥अग्नेभ्यावर्त्तिन्न भिमानिवर्त्तस्वायु
षावर्च्चसाप्रजयाधनेन॥संन्यामेधयारय्यापोषेण॥७॥अ
ग्नेअंगिरः॥शतंतेसंत्वावृतःसहस्रंतउपावृतः॥अधा॥
पोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्न्नोरयिमाकृधि २२५

र्णै ॥ पुनरूर्ज्जा ॥ निवर्त्तस्व पुनरग्न ऽ इषायुषा ॥ पुनर्न्नः पाह्य
ꣳहसः ॥ ९ ॥ सह रय्या ॥ निवर्त्तस्वाग्ने पिन्वस्व धारया ॥ विश्वप
स्न्या विश्वतस्परि ॥ १० ॥ आत्वा ॥ हार्षमंतरभूर्द्ध्रुवस्तिष्ठाविचा
चलिः ॥ विशस्त्वा सर्व्वा वांछंतु मा त्वद्राष्ट्रमधिभ्रशत ॥ ११ ॥ उ
दुत्तमं ॥ वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ॥ अथा
वयमादित्य व्रते तवानागसो ऽ अदितये स्याम ॥ १२ ॥ अग्ने बृह

संहि॰ न॥ अग्ने बृहन्नुषसामूर्ध्वो ऽअस्थान्निर्ज्जगन्वांतमसोज्योति अ॰ १२
११६ षागात्॥ अग्निर्भानुना रुशता स्वंग ऽआजातो विश्वासद्मां
न्यप्राः॥ २३॥ हꣳसः शुचिषत्॥ हꣳसः शुचिषद्वसुरंतरिक्ष
सद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमस
दब्जा गोजा ऽऋतजा ऽअद्रिजा ऽऋतं बृहत्॥ २४॥ सीदत्वं मा
तुरस्या ऽउपस्थे विश्वान्यग्ने वयुनानि विद्वान्॥ मैनांतपसा॥ ११६

मार्चिषान्नितशोचीरंतंरस्याᳬं शुक्रज्योतिर्विभाहि ॥२५॥ अं
तरग्ने ॥ रुचात्वमुखायाः सदने स्वे ॥ तस्यास्त्वᳬं हरसा तपं जा
तवेदः शिवोभव ॥२६॥ शिवोभूत्वा ॥ मह्यमग्ने ऽअथो सीद
शिवस्त्वम् ॥ शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥
२७ ॥ दिवस्परि ॥ प्रथमं यज्ञे ऽअग्निरस्मद्द्वितीयं परि जातवेदा
ः ॥ तृतीयमप्सु नृमणा ऽअजस्रमिंधान ऽएनं जरते स्वाधीः

संहि
११७

१९ ॥ विद्माते ॥ अग्नेत्रेधात्रयाणि विद्मातेधामविभृतापुरु ॥ अ॰१२
त्रा ॥ विद्मातेनामपरमंगुहायद्विद्मातमुत्संयतऽआजगंथ ॥
२० ॥ समुद्रेत्वा ॥ नृमणाअप्स्वंतर्नृचक्षाऽईधेदिवोअग्नऊ
धन ॥ तृतीयेत्वारजसितस्थिवांसमपामुपस्थेमहिषाअ
वर्धन ॥ २१ ॥ अक्रंददग्निः ॥ अक्रंददग्निस्तनयन्निवद्यौःक्षा
मारेरिहद्वीरुधःसमंजन ॥ सद्योजज्ञानोविहीमिद्धोअख्य ११७

ह्वारोदसीभानुनाभात्यंतः॥२२॥ श्रीणामुदारः॥ श्रीणामुदारो
धरुणोरयीणांमनीषाणांप्रार्पणः सोमगोपाः॥ वसुःसूनुः
सहसोऽअप्सुराजाविभात्यग्रउषसामिधानः॥२३॥ विश्व
स्यकेतुः॥ भुवनस्यगर्भःऽआरोदसीऽअपृणाज्जायमान
ः॥ विडुंचिदद्रिमभिनत्परायंजनायदग्निमयजंतपंच॥२४॥
उशिक्पावकः॥ उशिक्पावकोऽअरतिःसुमेधामर्त्येष्वग्नि

संहि॰ ११८ नि अ॰ १२

रमृतोधायि॥ इयर्त्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्या

मिनक्षन॥२४॥ दृशानोरुक्मः॥ दृशानोरुक्मउर्व्याव्यद्यौ

दुर्मर्षमायुःश्रियेरुचानः॥ अग्निरमृतोऽअभवद्वयोभि

र्यदेनंद्यौरजनयत्सुरेताः॥२५॥ यस्ते॥ अद्यकृणवद्भद्रशो

चेऽपूपंदेवघृतवंतमग्ने॥ प्रतंनयप्रतरंवस्योऽअच्छाभिसुम्नं

देवभक्तंयविष्ठ॥२६॥ आतम्॥ आतंभजसौश्रवसेष्वग्नऽउ ११८

त्वेऽन्तऽआजन्यास्समाने॥ प्रियःसूर्येप्रियोऽअग्नाभवा
त्युज्जातेनभिनदद्उज्जनित्वैः॥२७॥ त्वामग्नेयजमानाऽअ
नुद्यून्विश्वावसूदधिरेवार्याणि॥ त्वयासहद्रविणमिच्छमा
नाव्रजंगोमंतमुशिजोविववुः॥२८॥ अस्ताव्यग्निः॥ अस्ता
व्यग्निर्नराथंसुशेवोवैश्वानरऋषिभिःसोमगोपाः॥ अ
द्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरम्॥२९

संहि: समिधाग्निं॥ दुवस्यत घृतैर्बोधयतातिथिम्॥ आस्मिन्हव्या अ.१२
११९ जुहोतन॥३०॥ उदुत्वा॥ विश्वेदेवा अग्नेभरंतु चित्तिभिः॥
सनोभव शिवस्त्वꣳ सुप्रतीको विभावसुः॥३१॥ प्रेत॥ प्रेद
ग्नेज्योतिष्मान्याहि शिवेभिरर्चिभिष्ट्वम्॥ बृहद्भिर्भानुभिर्भा
सन्माहिꣳसीस्तन्वाप्रजाः॥३२॥ अक्रंददग्निः॥ स्तनयन्नि
वद्यौः क्षामारेरिहद्वीरुधः समंजन्॥ सद्यो जज्ञानो विही॥ ११९

मिद्धोऽअख्यदारोदसीभानुनाभात्यंतः॥३३॥ प्रप्रायम॥प्र
प्रायमग्निर्भरतस्यशृण्वेवियत्सूर्योनरोचतेबृहद्भाः॥अ
भियःपूरुंपृतनासुतस्थौदीदायदैव्योऽअतिथिःशिवोनः
३४॥ आपोदेवीःप्रतिगृभ्णीतभस्मैतत्स्योनेकृणुध्वंसु
रभाऽउलोके॥ तस्मैनमंतांजनयःसुपत्नीर्मातेवपुत्रंबि
भृताप्स्वेनत॥३५॥ अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे॥

संहि० गर्ब्भेसंजायसेपुनः ॥३६॥ गर्ब्भोऽअसि ॥ गर्ब्भोऽअस्योषधीनां अ० १२

१२४ गर्ब्भोव्वनस्पतीनाम् ॥ गर्ब्भोव्विश्वस्यभूतस्याग्नेगर्ब्भोऽअपा

मसि ॥३७॥ प्रसद्यभस्मना ॥ योनिमपश्चपृथिवीमग्ने ॥ संᳬ

सृज्यमातृभिष्ट्वंज्योतिष्मान्पुनरासदः ॥३८॥ पुनरासद्य ॥ स

दनमपश्चपृथिवीमग्ने ॥ शेषेमातुर्यथोपस्थेन्तरस्याᳬ ॥

शिवतमः ॥३९॥ पुनरूर्ज्जा ॥ निवर्त्तस्वपुनरग्नऽइषायुषा १२४

॥पुनर्न्नः पाह्यꣳहसः॥४०॥ सह रय्या॥ निवर्त्तस्वाग्ने पिन्वस्व

धारया॥ विश्वप्स्न्या विश्वतस्परि॥४१॥ बोधा मे॥ ऽअस्य वच

सो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः॥ पीयति त्वो ऽअ

नु त्वो गृणाति वन्दारुष्टे तन्वं वन्दे ऽअग्ने॥४२॥ स बोधि॥ सूरिर्म

घवा वसुपते वसुदावन्॥ युयोध्यस्मद्द्वेषाꣳसि विश्वक

र्म्मणे स्वाहा॥४३॥ पुनस्त्वा॥ दित्या रुद्रा वसवः समिन्धतां पु

नब्रह्मणोवसुवनीथयज्ञैः॥घृतेनत्वंतन्वंवर्धयस्वसत्याःसं
तुयजमानस्यकामाः॥४४॥अपेत॥वीतविचसर्पतातोये
त्रस्थपुराणायेचनूतनाः॥अदाद्यमोवसानंपृथिव्याअक्र
न्निमंपितरोलोकमस्मै॥४५॥संज्ञानमसि॥कामधरणं
मयितेकामधरणंभूयात्॥अग्नेर्भस्मास्यग्नेःपुरीषम
सिचितस्थपरिचितऊर्ध्वचितःश्रयाध्वम॥४६॥अयंसो

सः॥ अयंऽसोअग्निर्यस्मिंत्सोममिंद्रःसुतंदधेजठरेवाव
शानः॥ सहस्त्रियंवाजमत्यंनसप्तिंऽससवांत्संस्तूयसे।
जातवेदः॥ ४७॥ अग्नेयत॥ अग्नेयत्तेदिविवर्चःपृथिव्यांय
दोषधीष्वप्स्वायजत्र॥ येनांतरिक्षमुर्वाततंथत्वेषःसभानु।
रर्णवोनृचक्षाः॥ ४८॥ अग्नेदिवः॥ अग्नेदिवोऽअर्णम।
छाजिगास्यच्छादेवाँऽऊचिषेधिष्ण्यायेयारोचनेपर।

संहि॰ १२२

स्तात्सूर्यस्य याश्चावस्तादुपतिष्ठंत ऽआपः ॥४९॥ पुरीष्यासो अ

ऽअग्नयः ॥ प्रावणेभिः सजोषसः । जुषंतां यज्ञमद्रुहोनमी

वा ऽइषो महीः ॥५०॥ इडामग्ने पुरुदंसं सनिं गोः शश्व

त्तमं हवमानाय साध ॥ स्यान्नः सूनुस्तनयो विजावाग्ने

सा ते सुमतिर्भूत्वस्मे ॥५१॥ अयं ते योनिरृत्वियो यतो जा

तो ऽअरोचथाः । तं जानन्नग्न ऽआरोहाथा नो वर्द्धया रयि १२२

म॥५२॥ चिदसि॥ तयादेवतयांगिरस्वद्ध्रुवासीद परिचिसिद॥
तयादेवतयांगिरस्वद्ध्रुवासीद॥५३॥ लोकंपृण॥ छिद्रंपृण॥
थोसीदध्रुवात्वम्॥ इंद्राग्नीत्वाबृहस्पतिरस्मिंन्योनावसीष
दन्॥५४॥ ताऽअस्यसूददोहसः सोमंश्रीणंतिपृश्नयः
जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः॥५५॥ इंद्रंविश्वा॥
इंद्रंविश्वाऽअवीवृधंत्समुद्रव्यचसंगिरः॥ रथीतमंरथ॥

सं॰हि॰ थीनांर्व्वाजांनाथं सत्पतिंपतिम्॥५६॥ समितम्॥ स्तमितर्ह॰सं अ॰१२
१२३ कल्पेथां संप्रियौरोचिष्णूसुमनस्यमानौ॥ इषमूर्ज्जमभि
संवसानौ॥५७॥ संवां॥ मनांसिसंव्व्रतासमुचित्तान्याकर
म्॥ अग्नेपुरीष्याधिपाभवत्वंनः। इषमूर्ज्जंयजमानायधेहि॥
हि॥५८॥ अग्नेत्वं॥ पुरीष्योरयिमान्पुष्टिमा शौं असि॥ शि
वाः कृत्वादिशः सर्वाः स्वंयोनिमिहासदः॥५९॥ भवतन्नः १२३

समनसौसचेतसावरेपसौ।मायज्ञꣳ·हिꣳ·सिष्टंमायज्ञपतिं
जातवेदसौशिवौभवतमद्यनः॥६०॥मातेवपुत्रंपृथिवीपु
रीष्यमग्निꣳस्वेयोनावभारुषा।तांविश्वैर्देवैऽऋतुभिःसं
विदानःप्रजापतिर्विश्वकर्माविमुंचतु॥६१॥असुन्वंतमय
जमानम्।असुन्वंतमयजमानमिछस्तेनस्येत्यामन्विहि
तस्करस्य।अन्यमस्मदिछसातऽइत्यानमोदेविनिऽर्ऋ।

संहि॰ य॰
१२५

तेतुभ्यमस्तु ॥ ६१ ॥ नमःसुते ॥ निऽर्ऋते तेतिग्मतेजोयस्मयंविचृ अ॰ १२
ताबंधमेतम् ॥ यमेनत्वंयम्यासंविदानोत्तमेनाके ऽअधिरो
हयैनम् ॥ ६२ ॥ यस्यास्ते ॥ घोरऽआसंजुहोम्येषांबंधानाम
वसर्ज्जनाय ॥ यांत्वाजनोभूमिरितिप्रमंदते निऽर्ऋतिंत्वा
हंपरिवेदविश्वतः ॥ ६३ ॥ यंते ॥ देवीनिऽर्ऋतिराबबंधपाशं
ग्रीवास्वविचृत्यम् ॥ तंते विष्याम्यायुषोनमध्यादथैतंपि १२५

तुमध्धिप्रसूतः॥ नमोऽस्तुस्मैयेदंचकार॥ ६५॥ निवेशनः संग

मनः॥ निवेशनः संगमनोवसूनांविश्वारूपाभिचष्टेशची

भिः॥ देवऽइवसविता सत्यधर्मेंद्रोनतस्थौसमरेपथीनाम्॥

६६॥ सीरायुंजंतिकवयोयुगाविन्वतेपृथक्॥ धीरादेवेषु

सुम्नया॥ ६७॥ युनक्तसीरा॥ वियुगातनुध्वंकृतेयोनौवपते

हबीजम्॥ गिराचश्रुष्टिः सभराऽअसन्नोनेदीयऽइत्सृण्यः प

संहि॰ क्षमेयात॥ ६८॥ शुनꣳसुफालाविकृषंतुभूमिꣳशुनंकीना अ॰१२
१२५ शा॰अभियंतुवाहैः॥ शुनासीराहविषातोशमानासुपिप्प
लाꣳ॰षधीःकर्त्तनास्मे॥ ६९॥ घृतेनसीता॥ घृतेनसीतामधु
नासमज्यतांविश्वैर्देवैरनुमतामरुद्भिः॥ ऊर्जस्वतीपयसा
पिन्वमानास्मांत्सीतेपयसाभ्याववृत्स्व॥ ७०॥ लांगलंपवीर
वत॥ लांगलंपवीरवत्सुशेवꣳसोमपित्सरु॥ तदुद्वपति। १२५

गामविंप्रफर्व्यंचपीवरींप्रस्थावद्रथवाहनम्॥७१॥कामंका
मदुघे॥धुक्ष्वमित्रायवरुणायच॥इंद्रायाश्विभ्यांपूष्णेप्रजा
भ्यऽओषधीभ्यः॥७२॥विमुचध्वम॥विमुच्यध्वमघ्न्यादेवया
नाऽअगन्मतमसस्पारमस्य॥ज्योतिरापाम॥७३॥सजूरब्द
॥सजूरब्दोऽअयवोभिः॥सजूरुषाऽअरुणीभिः॥सजोष
सावश्विनादंसोभिः॥सजूःसूरऽएतशेनसजूर्वैश्वान

संहि॰ रः॥इडयाघृतेनस्वाहा॥७४॥या॥ओषधीः॥पूर्वाजातादेवेभ्यस्त्रि अ॰१२
२२६ युगंपुरा॥मनैनुबभ्रूणामहं॰शतंधामानिसप्तच॥७५॥शतं
वः॥शतंवो॥अंबधामानिसहस्रमुतवोरुहः॥अधाशतक्र
त्वोयूयमिमंमे॥अगदंकृत॥७६॥ओषधीःप्रतिमोदध्वंपु
ष्पवतीः॥प्रसूवरीः॥अश्वा॥इवसजित्वरीर्वीरुधः॥पारयिष्ण्व
ः॥७७॥ओषधीरितिमातरस्तद्वोदेवीरुपब्रुवे॥सनेयमश्वं॥ २२६

गांवासः आत्मानंतव पूरुष ॥ ४ ॥ अश्वत्थेवं ॥ अश्वत्थे

वोनिषदनं पर्णेवोवसतिष्कृता ॥ गोभाजयित्किलासथयत्स

नवथपूरुषम ॥ ५ ॥ यत्रौषधीः ॥ समग्मतराजानः समिता

विव ॥ विप्रः सः उच्यते भिषग्रक्षोहामीवचातनः ॥ ६ ॥ अ

श्वावतीं सोमावतीम ॥ अश्वावतीं सोमावतीमूर्जयं

तीमुदोजसम ॥ आवित्सिसर्वाः ओषधीरस्माः अरिष्टतात

संहि॰ १२७ ये॥ ८०॥ नद्युष्मा॥ उच्छुष्माऽओषधीनांगावोगोष्ठादिवेरते॥ ध अ॰ १२
नꣳसनिष्यंतीनामात्मानंतवपूरुष॥ ८१॥ इष्कृतिर्नामवोमा
ताथोयूयꣳस्थनिष्कृतीः॥ सीराःपतत्रिणीस्थनयदामयति
निष्कृथ॥ ८२॥ अतिविश्वाः॥ अतिविश्वाःपरिष्ठास्तेनऽइवव्र
जमक्रमुः॥ ओषधीः॥ प्राचुच्यवुर्यत्किंचतन्वोरपः॥ ८३॥ यद
दिमाः॥ यदिमावाजयन्नहमोषधीर्हस्तऽआदधे॥ आत्माय १२७

क्ष्मस्यनश्यतिपुराजीवगृभोयथा ॥ ११ ॥ यस्यौषधीः प्रस-
र्पथांगमंगंपरुष्परुः ॥ ततोयक्ष्मंविबाधध्वऽउग्रोमध्यमशी-
रिव ॥ १२ ॥ साकंयक्ष्मप्रपतचाषेणकिकिदीविना ॥ साकंवा-
तस्यध्राज्यासाकंनश्यनिहाकया ॥ १३ ॥ वातम् ॥ ई११ ॥ अन्या
वः ॥ अन्यावोऽअन्यामवत्वन्यान्यस्याऽउपावत ॥ ताः सर्वा-
संविदानाऽइदंमेप्रावतावचः ॥ १४ ॥ याः फलिनीर्याऽअफ-

संहि. लिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः। बृहस्पतिप्रस अ.१२
१२९ तास्तानोमुंचंत्वꣳहसः। ८९ मुंचंतुमा। शपथ्यादथोवरुण्या
दुत। अथोयमस्यपड्बीशात्सर्वस्माद्देवकिल्बिषात्। ९०॥
अवपतंतीरवदंदिवऽओषधयस्परि। यंजीवमश्नवामहै।
नसरिष्यातिपूरुषः। ९१। याऽओषधीः। सोमराज्ञीर्बह्वीः। श
तविचक्षणाः। तासामसित्वमुत्तमारंकामायꣳशꣳहृदे। ९२ १२९

याऽओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु बृहस्पतिप्र

सूताऽअस्यैसंदत्तवीर्यम् ॥ १९ ॥ याश्च । याश्चेदमुपशृण्वंति

याश्चदूरंपरागताः सर्वाः संगत्यवीरुधोस्यैसंदत्तवीर्यम् ॥

२१ ॥ मावः । मावोरिषत्खनितायस्मैचाहंखनामिवः द्विपा

च्चतुष्पादस्माकं सर्वमस्त्वनातुरम् ॥ २० ॥ ओषधयः सा

म ॥ ओषधयः समवदंतसोमेनसहराज्ञा । यस्मैकृणोतिब्रा

सं॰हि॰ १२५ स्रणस्तं राजंन्पारयमसि ॥ १६ ॥ नाम्नापित्रीबलासस्य ॥ नाम्ना अ॰ १२

पित्रीबलासस्यार्ऽसि ऽअपचितामसि ॥ अथोजातस्ययक्ष्मा

णांपाकारोरसिनाम्नानि ॥ १७ ॥ त्वांगंधर्वाः ॥ त्वांगंधर्वाऽअ

खनंस्त्वामिंद्रस्त्वांबृहस्पतिः त्वामोषधेसोमोराजाविद्वा

न्यक्ष्माद्दमुच्यत ॥ १८ ॥ सहस्वमे ॥ अरातीः सहस्वपृतनाय

तः ॥ सहस्वसर्वंपाप्मानंऽ सहमानास्योषधे ॥ १९ ॥ दीर्घायु १२५

स्ते ॥ दीर्घायुत्व ऽ ओषधे खनिता यस्मै च त्वा खनाम्यहम् ॥ अथो
त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ १०० ॥ त्वमुत्तमास्यो
षधे तव वृक्षा ऽ उपस्तयः ॥ उपस्तिरस्तु सो स्माकं यो ऽ अस्मा
ऽँ ऽ अभिदासति ॥ १०१ ॥ मा मा हिंसीज्जनिता यः पृथिव्या
यो वा दिवं सत्यधर्म्मा व्यानट् ॥ यश्चापश्चन्द्राः प्रथमो जजान
कस्मै देवाय हविषा विधेम ॥ १०२ ॥ अभ्यावर्त्तस्व पृथिवि यज्ञेन

संहि० पयसासह । वापांतेअग्निं रिषितो । अरोहत ॥ १०३ ॥ अग्नेयत ॥ अ० १२

२३५ अग्नेयत्तेशुक्रं यच्चंद्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो भराम

सि ॥ १०४ ॥ इषमूर्ज्जम ॥ इषमूर्ज्जमहमित । आदमृतस्ययोनिंम

हिषस्यधाराम् । आमागोषुविशत्वातनूषुजहामिसेदिमनि

राममीवाम् ॥ १०५ ॥ अग्नेतव ॥ श्रवोवयोमहिभ्राजंते । अर्चयो

विभावसो ॥ बृहद्भानोशवसावाजमुक्थ्यंदधासिदाशुषेक २३०

वे॥ २.६॥ पावकवर्च्चाः शुक्रवर्च्चाः अनूनवर्च्चाऽउदियऽर्षि
ब्भानुना॥ पुत्रोमातराविचरन्नुपावसि पृणक्षिरोदसीऽउभे॥
२.७॥ ऊर्ज्जोनपात॥ ऊर्ज्जोनपाज्जातवेदः सुशस्तिभिर्म्मन्दस्व॥
धीतिभिर्हितः॥ त्वेऽइषः संदधुर्भूरिवर्पसश्चित्रोतयोवामजा
ताः॥ २.८॥ इरज्यन्नग्ने॥ प्रथयस्वजन्तुभिरस्मे रायोऽअमर्त्य॥
सदर्शतस्यवपुषोविराजसिपृणक्षिसानसिंक्रतुम्॥ २.९॥

संहि॰ ष्कर्त्तारमध्वरस्य॥ प्रचेतसंक्षयंतं॰ राधसोमहः॥ रातिंवाम अ॰१२
२३१ स्यसुभगांमहीमिषंदधासिसानसिं॰ रयिम्॥२२०॥ ऋता
वानंमहिषं॥ विश्वदर्शतमग्निं॰ सुम्नायदधिरेपुरोजनाः॥
श्रुत्कर्णं॰ सप्रथस्तमंत्वागिरा॥ दैव्यंमानुषायुगा॥२२१॥ आ
प्यायस्व॥ समेतुतेविश्वतः सोमवृष्ण्यम्॥ भवावाजस्यसंग
थे॥२२२॥ संते॥ संतेपयांसिसमुयंतुवाजाः संवृष्ण्यान्यभि २३१

मातिषाहः॥ आप्यायमानो अमृतायसोमदिविश्रवांस्यु
त्तमानिधिष्व॥२२३॥ आप्यायस्वमदिंतमसोमविश्वेभिरंशु
भिः॥ भवानः सुश्रवस्तमः सखावृधे॥२२४॥ आते वत्सो
मनोयमत्परमाच्चित्सधस्थात्॥ अग्नेत्वांकामयागिरा॥२२५
तुभ्यंता॥ तुभ्यंता॥ अंगिरस्तमविश्वाः सुक्षितयः पृथक्॥
अग्नेकामाययेमिरे॥२२६॥ अग्निः प्रियेषुधामसुकामो

सहि·
१३२·

ऋतस्यचनभस्य ॥ सम्राडेकोविराजति ॥ ११७ ॥ इतिवाजसनेसं अ·१२
हितायांद्वादशोध्यायः ॥ मयिगृह्णामि ॥ मयिगृह्णाम्यग्रेऽअ
ग्निꣳरायस्पोषायसुप्रजास्त्वायसुवीर्याय ॥ मामुदेवताः
सचन्ताम् ॥ १ ॥ अपांपृष्ठम् ॥ अपांपृष्ठमसियोनिरग्नेःसमु
द्रमभितःपिन्वमानम् ॥ वर्द्धमानोमहाँ॥ऽआचपुष्करेदिवो
मात्रयावरिम्णाप्रथस्व ॥ २ ॥ ब्रह्मजज्ञानम् ॥ ब्रह्मजज्ञानंप्र १३२

थमंपुरस्ताद्विसीमतः स्रुरुचोवेनऽआवः ॥ सबुध्न्याऽउप
माऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥३॥ हिरण्यग
र्भः सम ॥ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेक
ऽआसीत ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहवि
षाविधेम ॥४॥ द्रप्सश्चस्कंद ॥ पृथिवीमनुद्यामिमंचयोनि
मनुयश्चपूर्व्वः ॥ समानंयोनिमनुसंचरंतंद्रप्संजुहोम्यनु

संहि॰ सप्तहोत्रा॥५॥ नमोस्तु॥ सर्पेभ्यो ये के च पृथिवीमनु॥ ये ऽन्त्र॥ अ॰ १३

२३३ तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥६॥ या ऽइषवः॥ या ऽइषवो

यातुधानानां ये वा वनस्पतीं॥ रनु॥ ये वावटेषु शेरते तेभ्यः स

र्पेभ्यो नमः॥७॥ ये वा॥ ये वामी रोचने दिवो ये वा सूर्यस्य रश्मि

षु॥ येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः॥८॥ कृणुष्व पा

जः॥ कृणुष्व पाजः॥ प्रसितिं न पृथ्वीं याहि राजेवामवाँ ऽइ २३३

जैन ॥ तन्वी मनुष्यसितिं दूरगानोस्त्वासिद्विध्यं रक्षसस्तपिष्ठैः ॥ ९ ॥

१० ॥ तव भ्रमासः ॥ तव भ्रमास ऽ आशुया पतंत्यनुस्पृश धृषता

शोशुचानः ॥ तपूंष्यग्ने जुह्वा पतंगानसंदितो विसृज वि

ष्वगुल्काः ॥ ११ ॥ प्रतिस्पशः ॥ प्रतिस्पशो विसृज तूर्णितमो भ

वापायुर्विशो ऽ अस्या ऽ अदब्धः ॥ यो नो दूरे ऽ अघशंसो यो

ऽ अंत्यग्ने माकिष्टे व्यथिरादधर्षीत ॥ १२ ॥ उदग्ने ॥ तिष्ठ प्र

संहि॰ १३६

त्यातनुष्वन्यमित्राँ२ ओँषतातिग्महेते॥ योनोऽअरातिꣳ समि॥ अ॰ १३

धानचक्रे नीचातंधक्ष्यतसन्नशुष्कम्॥ १२॥ ऊर्द्ध्वोभव प्रति

विध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने॥ अवस्थिरातनुहि

यातुजूनांजामिमजामिंप्रमृणीहिशत्रून्॥ अग्नेष्ट्वातेज

सासादयामि॥ १३॥ अग्निर्मूर्द्धा॥ दिवः ककुत्पतिः पृथि

व्याः अयम्॥ अपाꣳरेताꣳसिजिन्वति॥ इंद्रस्यत्वौजसा॥ १३६

सादयामि।१४।भुवोयज्ञस्य।रजसश्चनेतायत्रानियुद्भिःस
चसेशिवाभिः।दिविमूर्द्धानंदधिषेस्वर्षांजिह्वामग्नेचकृ
षेहव्यवाहम्।१५।ध्रुवासि।धरुणास्तृताविश्वकर्मणा।
मात्वासमुद्रउद्वधीन्मासुपर्णोऽव्यथमानापृथिवींदृꣳ
ह।१६।प्रजापतिष्ट्वा।सादयत्वपांपृष्ठेसमुद्रस्येमन्।व्य
चस्वतींप्रथस्वतींप्रथस्वपृथिव्यसि।१७।भूरसि।भूर

सं०हि० सिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री। अ०१३

१३५ पृथिवींयच्छपृथिवींदृꣳहपृथिवींमाहिꣳसीः॥१८॥वि

श्वस्मैप्राणाय॥विश्वस्मैप्राणायापानायव्यानायोदाना।

यप्रतिष्ठायैचरित्राय॥अग्निष्ट्वाभिपातुमह्यास्वस्त्याछ

र्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवासीद॥१९॥कांडा

त्कांडात्प्ररोहंति॥कांडात्कांडात्प्ररोहंतीपरुषःपरुषस्प। १३५

रि॥एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच॥२०॥याशतेन॥प्रतनो
षिसहस्रेणविरोहसि॥तस्यास्तेदेवीष्टकेविधेमहविषावय
म्॥२१॥यास्ते॥अग्नेसूर्येरुचोदिवमातन्वंतिरश्मिभिः॥ता
भिर्नो॥अद्यसर्वाभीरुचेजनायनस्कृधि॥२२॥यावः॥या
वोदेवाःसूर्येरुचोगोष्वश्वेषुयारुचः॥इंद्राग्नीताभिःसर्वा
भीरुचंनोधत्तबृहस्पते॥२३॥विराड्ज्योतिः॥विराड्ज्योति

सं॰हि॰
१३६
रधारयत्त्वंराज्ज्योतिरधारयत ॥ प्रजापतिष्ट्वासादयतुपृष्ठेपृ अ॰१३
थिव्याज्योतिष्मतीम् ॥ विश्वस्मैप्राणायापानायव्यानाय
विश्वंज्योतिर्यच्छ ॥ अग्निष्टेधिपतिस्तयादेवतयांगिरस्वद्ध्रु
वासीद ॥ २४ ॥ मधुश्चमाधवश्चवासंतिकावृतू ॥ अग्नेरं
तःश्लेषोसिकल्पेतांद्यावापृथिवीकल्पंतामापऽओषध
यःकल्पंतामग्नयःपृथङ्मममज्यैष्ठ्यायसव्रताः ॥ येऽअग्नय १३६

ग्नय॒ः सम॑नसो॒न्तरा॒द्यावा॑पृथि॒वी इ॒मे॥ वासं॑तिका॒वृतू॒ अ॒भि॒क॒ल्प॑माना॒ इंद्र॑मिव दे॒वा अ॒भिसं॑वि॒शं॑तु॒तया॑ दे॒वत॑या ङ्गिर॒स्वद्ध्रु॒वे सी॑दतम्॥२५॥ अषा॑ढासि॒ सह॑माना॒ सह॒स्वारा॑तीः॒ सह॑स्व पृतनाय॒तः॥ स॒हस्र॑वीर्यासि॒ सा मा॑ जिन्व॥२६॥ मधु॒ वाता॑ ऋता॒य॒ते मधु॑ क्षरंति॒ सिंध॑वः॒ माध्वी॑र्नः संत्वोष॑धीः॒॥२७॥ मधु॒ नक्त॑म्॒ मधु॒ नक्त॑मु॒तोष॑सो॒ मधु॑मत्पार्थि

संहि॰ वृ॰ रजः॥ मधुद्यौरस्तु नः पिता॥२७॥ मधुमान्नः॥ मधुमा॰ अ॰२३
१२७ न्नोवन स्पर्मधुमा शॅं॰ अस्तु सूर्यः॥ माध्वीर्गवीनवंतुनः॥
२८॥ अपांगंनेन॥ अपांगंनेत्सी दमात्वासूर्योनि तापग्नी
न्माग्निर्वैश्वानरः॥ अछिन्नपत्राः प्रजा अनुवीक्षस्वानु
त्वादिव्याबृष्टिः सचताम॥२९॥ त्रीन्त्समुद्रान॥ त्रीन्त्समुद्रां॰
त्समसृपत्स्वर्गानपांपतिर्वृषभइष्टकानाम॥ पुरीषंवसानः १२७

स्कृतस्यलोकेतत्रगछयत्रपूर्वेपरेताः॥३१॥महिद्यौः॥पृ
थिवीचनऽइमंयज्ञंमिमिक्षताम्॥पिपृतान्नोभरीमभिः॥३२
विष्णोःकर्माणि॥पश्यतयतोव्रतानिपस्पशे॥इंद्रस्ययुज्यः
सखा॥३३॥ध्रुवासि॥धरुणेतोजज्ञेप्रथममेभ्योयोनिभ्यो
ऽअधिजातवेदाः॥सगायत्र्यात्रिष्टुभानुष्टुभाचदेवेभ्योह
व्यंवहतुप्रजानन्॥३४॥इषेराये॥रमस्वसहसेद्युम्नऽऊर्जे

संहि॰ १३९ ऽअपत्साय॥ संम्राडसिस्वराडसिसारस्वतौत्वोत्सौप्रावताम्॥ अ॰१३
३५॥ अग्नेयुक्ष्व॥ अग्नेयुक्ष्वाहियेतवाश्वासोदेवसाधवः॥
अरंवहंतिमन्यवे॥ ३६॥ युक्ष्वाहि॥ देवहूतमाशँ॥ अश्वाशँ॥
ऽअग्नेरथीरिव॥ निहोतापूर्व्यःसदः॥ ३७॥ संम्यक्स्रवंति॥
सरितोनधेनाः॥ अंतर्हृदामनसापूयमानाः॥ घृतस्यधारा
अभिचाकशीमिहिरण्ययोवेतसोमध्येऽ अग्नेः॥ ३८॥ ऋचे १३९

त्वा॥ रुचे त्वा भासे त्वा ज्योतिषे त्वा॥ अभूदिदं विश्वस्य भुवनस्य
वाजिनमग्नेर्वैश्वानरस्य च॥ ३९॥ अग्निर्ज्योतिषा॥ ज्योतिष्मान्
